CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

Coll. No. 563

Title Yogānanda

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 563 Subject: Vedānta.

Title: Yogānanda.

Author: — Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11.8" by 4.9" Extent: 41 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: —.

॥श्री॥ नत्वाश्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥ ब्रह्मानंदाभिधंग्रंथंव्याकुर्वेबोधसिद्धये॥१॥ चिकी-
र्षितस्यग्रंथस्यनिष्प्रत्यूहपरिपूरणायपरिपंथिकल्मषनिवृत्तयेऽभिमतदेवतातत्त्वानुसंधानल-
क्षणंमंगलमाचरन्श्रोतृप्रवृत्तिसिद्धयेसप्रयोजनमभिधेयमाविष्कुर्वन्ग्रंथारंभंप्रतिजानीते॥ ब्रह्मा-
नंदमिति॥ निर्विशेषंपरंब्रह्मसाक्षात्कर्तुमनीश्वराः॥ येमंदास्तेनुकंप्यंतेसविशेषनिरूपणैरितिस-
विशेषब्रह्मरूपाणांदेवतानांतत्त्वस्यनिर्विशेषब्रह्मरूपताभिधानाद्ब्रह्मणआनंदोब्रह्मेत्यादिश्रुति-
भिरानंदरूपताभिधानाद्ब्रह्मानंदमित्यानंदरूपस्यब्रह्मणोवाचकशब्दप्रयोगेणयद्धिमनसा-
ध्यायतितद्वाचावदतीतिश्रुत्युक्तन्यायेनब्रह्मानुसंधानलक्षणंमंगलाचरणंसिद्धंब्रह्मणश्चस-
र्ववेदांतेप्रतिपादितत्वादस्यप्रकरणरूपस्यास्यग्रंथस्यापितदेवविषयइतिब्रह्मशब्दप्रयोगेणविष-
यश्चसूचितः। ऐहिकामुष्मिकानर्थव्रातंहित्वासुखायतइत्युत्तरार्द्धेनानिष्टनिवृत्तीष्टप्राप्तिरूपंप्रयोज- ॥१॥

नद्वयंसुतरांचोक्तं॥ ब्रह्मानंदंब्रह्मचासावानंदश्चेतिब्रह्मानंदः वाच्यवाचकयोरभेदोपचारात्तत्प्रतिपाद-
कोग्रंथोपिब्रह्मानंदस्तंप्रवक्ष्यामितस्मिन्नितिप्रतिपाद्यप्रतिपादकरूपेब्रह्मानंदेज्ञातेऽवगतेसत्यैहिका-
मुष्मिकानर्थव्रातमैहिकानामिहलोकेभवानांदेहपुत्रादिष्वहंममाऽभिमानप्रयुक्तानामाध्यात्मिकादिता-

ब्रह्मानंदंप्रवक्ष्यामिज्ञातेतस्मिन्नशेषतः॥ ऐहिकामुष्मिकानर्थव्रातंहित्वासुखायते॥१॥

पानामामुष्मिकानांपरलोकेभवानांचतेषामनर्थव्रातोऽनर्थसमूहस्तमशेषतोनिरवशेषंयथाभवतितथा
हित्वापरित्यज्यसुखायतेसुखरूपंब्रह्मैवभवति॥१॥ ब्रह्मज्ञानस्यानिष्टनिवृत्तीष्टप्राप्तिहेतुत्वेश्रुति-
स्मृतिवाक्यानिप्रमाणानिसंतीतिप्रदर्शयितुकामस्तावत्। ब्रह्मविदाप्नोतिपरंश्रुतेत्येवमभग-

वदृशेभ्यस्तरतिशोकमात्मविदितिसोहंभगवःशोचामितंमाभगवाञ्छोकस्यपारंतारयत्विति च वाक्यद्वयम
र्थतः॥पठति॥ब्रह्मविदितिब्रह्मवेत्तीतिब्रह्मवित्परमुत्कृष्टमानंदरूपंब्रह्मत्वाप्नोत्यात्मवित्तत्त्वमस्यादिवा
क्यंदेशकालवस्तुपरिच्छेदशून्यमात्मानंवेत्तीतिआत्मवित्शोकंस्वसंसृष्टंपुरुषंशोचयतीतिशोकस्तमो
मूलःसंसारस्तंतरतीतिश्रुतिक्रामति॥नन्वुदाहृततैत्तिरीयकश्रुतिवाक्येब्रह्मज्ञानस्यपरप्राप्तिहेतुत्वेना

ब्रह्मवित्परमाप्नोतिशोकंतरतिचात्मवित्॥ ॥

वभासतेनानंदप्राप्तिहेतुत्वेनाशंक्यानंदप्राप्तिहेतुत्वप्रतिपादनपरंरसोवैसः रसंह्येवायंलब्ध्वानंदीभ
वतीतितैत्तिरीयमेववाक्यमर्थतःपठतिरसइति॥सत्यंज्ञानमनंतंब्रह्मतस्माद्वाएतस्मादात्मनआकाशः २
संभूतइतिप्रकरणाद्ब्रह्मात्मशब्दाभ्यामभिहितोयआत्मासौरसःसारआनंदरूपइत्यर्थःरसमानंदरू

पंब्रह्मलब्ध्वाब्रह्माहमस्मीतिज्ञानेनप्राप्यानंदीभवति॥अपरिच्छिन्ननिरतिशयसुखवान्भवति॥उक्तमर्थं
व्यतिरेकप्रदर्शनेनद्रढयति॥नान्यथेति॥अन्यथाब्रह्मात्मैकत्वज्ञानंविहायसाधनांतरानुष्ठानेननानं
दीभवतीत्यर्थः॥२॥एवमन्वयमुखेनेष्टप्राप्तिमनिष्टनिवृत्तिप्रतिपादनपराणिवाक्यानिप्रदर्श्यान्वय
व्यतिरेकाभ्यामनर्थनिवृत्तिप्रदर्शनपरंयदाह्येवैषएतस्मिन्नदृश्येनात्म्येनिरुक्तेनिलयनेऽभयंप्रति

रसोब्रह्मरसंलब्ध्वानंदीभवतिनान्यथा॥२॥ ॥

ष्ठांविंदतेअथसोऽभयंगतोभवतियदाह्येवैषएतस्मिन्नुदरमंतरंकुरुतेअथतस्यभयंभवतीतिवाक्य
द्वयमर्थतोनुक्रामति॥प्रतिष्ठामिति॥अस्यचायमर्थःयदायस्मिन्कालेहीतिविद्वत्प्रसिद्धिप्रदर्शनपरो
निपातःएवेतिअयमेवानर्थनिवृत्त्युपायोनान्यइतिनियमार्थःएषमुमुक्षुरेतस्मिन्विद्वदनुभवगम्ये

अदृश्ये इंद्रियागोचरे अनात्म्ये अनात्मीये स्वरूपतया स्वकीयत्वरहिते अनिरुक्ते निर्वचनं शब्देनाभि
धानं यत्र नास्ति तदनिरुक्तं तस्मिन् अनिलयने निलीयतेऽस्मिन्निति निलयनमाधारः स न विद्य
ते यस्य तस्मिन् स्वमहिम्नि स्थिते इत्यर्थः अभयं द्वितीयाद्वै भयं भवतीति श्रुतेः भयशब्देनात्र भय
हेतुर्भेदो लक्ष्यते न विद्यते भयं भेदो यथा भवति तथा प्रतिष्ठां प्रकर्षेण संशयविपर्ययादिराहित्येन स्थि

प्रतिष्ठां विंदते स्वस्मिन्सदा स्यादयमोऽभयः ॥ कुरुते स्मिन्नंतरं चेद्यस्तस्य भयं भवेत् ॥३॥

तिः ब्रह्माहमस्मीत्यवस्थानं प्रतिष्ठां तां विंदते गुरूपसत्त्यादिना श्रवणादिकं कृत्वा लभते अथ तदा
नीमेव स एवंविद्वानभयं भयरहितं मोक्षरूपमद्वितीयं ब्रह्म गतः प्राप्तो भवति ॥ ब्रह्म वेद ब्रह्मैव भ
तीति श्रुतेः यदा यस्मिन्नेव कार्ये उक्तपूर्वोक्ते एतस्मिन्नदृश्यत्वादिगुणके ब्रह्मणि यो गभिन्ने ब्रह्म ॥३॥

ल्पमुदिति निपातोऽपिशब्दार्थोऽरं तु तत्र अल्पमपि अंतरं भेदं उपास्योपासकादिलक्षणं कुरुते पश्य
ति अथ तस्य नामनेकार्थत्वात् यतः तदानीमेव तस्य भेददर्शिनो भयं संसारप्रयुक्तं दुःखं भवति ॥३॥ भेदद
र्शिनो भयं भवतीत्येतत् दृढीकर्तुं ब्रह्मात्मैकत्वज्ञानरहितानां वाय्वादीनां भयप्रदर्शनपरं भीषास्मा
द्वातः पवत इत्यादिमं मंत्रमर्थतः पठति ॥ वायुरिति ॥ वाय्वादयो जगन्नियामकत्वेन प्रसिद्धाः पंचापि दे

वायुः सूर्यो वह्निरिंद्रो मृत्युर्जन्मांतरेऽतरे ॥ कृत्वा धर्मं विजानंतोऽप्यस्माद्भीताश्चरंति हि ॥४॥

वताः अतीते जन्मनि निधर्मविशेषपूर्वं लक्षणं विजानंतोऽपि ज्ञानपूर्वकमनुष्ठितवंतोऽप्यंतरे प्रत्य
ब्रह्मणो भेदं कृत्वाऽस्माद्ब्रह्मणो भीताः अस्मिन्वाय्वादिजन्मनि चरंति स्वस्वव्यापारेषु सदा प्रवर्तंते
हिशब्देन भयादस्याग्निस्तपति भयात्तपति सूर्यः भयादिंद्रश्च वायुश्च मृत्युर्धावति पंचम इति कठश्रुतेः

यमेनोक्तां प्रसिद्धं दर्शयति ॥४॥ ननु तरति शोकमात्मविदित्यादिश्रुत्याहतेषु वाक्येषु ब्रह्मानंदज्ञानस्याऽनर्थनिवृत्तिहेतुत्वं स्पष्टं नावभासत इत्याशंक्य तत्प्रतिपादनपरं वाक्यमुदाहरति । आनंदमिति । राहोः शिर इतिवद्भेदव्यपदेशश्चौपचारिकः ब्रह्मणः स्वरूपभूतमानंदं विद्वानपरोक्षतया जानन्पुरुषः कुतश्चन कस्मादपि ऐहिकभयहेतोर्व्याघ्रादेः पारलौकिकभयहेतोः पापादेर्वा न बिभेति भयं न प्राप्नोति

आनंदं ब्रह्मणो विद्वान्न बिभेति कुतश्चन ॥ एतमेव न तपत्येषा चिंता कर्माग्निसंभृता ॥५॥ ७ ॥

ननु तत्त्वविदः पापादेर्भयं नास्तीत्येतत्कुतोऽवगम्यत इत्याशंक्य तत्प्रतिपादकमेतं ह वाव न तपति किमहं साधु नाकरवं किमहं पापमकरवमितीति वाक्यमर्थतः पठति । एतमिति । कर्माग्निसंभृता पुण्यपापरूपं कर्मैवाग्निः करणाकरणाभ्यामवश्यं तापहेतुत्वात्तेन संभृता संपादिता एषा पुण्यं नाकरवं क ५

स्मात्पापं तु कृतं तु कुत इत्येवंरूपा चिंता एतमेव तत्त्वविदमेव न तपेन्न संतापयेन्नाममविद्वांसं तु तया चिंतया सदा संतप्यत इत्यर्थः ॥५॥ पुण्यपापयोस्तापकत्वे हेतुप्रदर्शनपरं स य एवं विद्वानेते आत्मानं स्पृणुते उभे ह्येवैष एते आत्मानं स्पृणुत इति वाक्यद्वयमर्थतः पठति । एवमिति ॥ स यः पुः कश्चित्तु मानेवमुक्तेन स यश्चायं पुरुषे यश्चासावादित्ये स एक इत्यनेन प्रकारेण विद्वाञ्जानन्वर्त्तते स एते पुण्यपा

एवं विद्वान्कर्मणी द्वे हित्वात्मानं स्मरेत्सदा ॥ कृते च कर्मणी स्वात्मरूपेणैवैष पश्यति ॥६॥

पे हित्वेत्यध्याहारः आत्मानं ब्रह्माभिन्नं प्रत्यंचं स्पृणुते प्रीणयति सदा स्मरेदित्यर्थः । यतः पुण्यपापयोर्मिथ्यात्वानुसंधानेन हानं कृतमतस्तद्विषया चिंतैव नास्ति कुतस्तन्निमित्तकस्ताप इत्यभिप्रायः । किंच एष विद्वानेते एवं कृते उभे पुण्यपापरूपे कर्मणी देहेंद्रियादिप्रवृत्त्या जनिते स्वात्मरूपेणैव इदं सर्वं सदयमात्मेता

ब्रह्मानं० ५

द्विवाच्योक्तश्चकारेण पश्यतीजानातीत्यर्थः अतः स्वात्माभिन्नत्वाद्व्याप्तापकत्वमितिभावः॥६॥ ननुनाभुक्तं
क्षीयते कर्म कल्पकोटिशतैरपीत्यादिशास्त्रसद्भावादनादौ संसारे बहुजन्मोपार्जितेषु पुण्यापुण्यलक्षणे
षु कर्मस्वसंख्यातेषु असिद्धत्वेनात्मनयाऽनुसंधानायोग्येषु सत्सु कथं तद्विषया चिंता न भवेदित्याशंक्य
सनिदानानां तेषां तत्वज्ञानेन विनाशितत्वान्न चिंताजनकत्वमित्यभिप्रायेण हृदयग्रंथ्यादिनिवृत्तिपरं

भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे॥७॥

मुंडकादिषु श्रुतिषु स्थितं वाक्यं पठति॥ भिद्यत इति॥ परावरे परमपि हैरण्यगर्भादिकं पदं अवरं निकृष्टं य
स्मात्तस्मिन्परात्मनि दृष्टे साक्षात्कृते अस्य साक्षात्कारवतः हृदयस्य बुद्धेर्ग्रंथिरात्मनश्चाध्यायोपि दृढसंश्ले
षरूपत्वाद्ग्रंथिरन्योन्याध्यासः भिद्यते विदीर्यते विनश्यतीत्यर्थः सर्वसंशयाश्चात्मा देहादिव्यतिरिक्तो न ५

वा देहादिव्यतिरिक्तोपि कर्तृत्वादिधर्मयोगी न वा अकर्तृत्वेपि तस्य ब्रह्मणो भेदोऽस्ति न वा अभेदेपि तज्ज्ञानं क
र्मादिसहितं मुक्तिसाधनं केवलं वेत्यादयः छिद्यंते द्वैधीक्रियंते तत्वतः साक्षात्कृततस्य वस्तुनः सं
अभावः शयविपर्ययविषयत्वाऽदर्शनादितिभावः कर्माणि संचितानि पुण्यापुण्यलक्षणानि क्षीयंते स्वनिदाना
ज्ञानविनाशेन विनश्यंतीति॥७॥ ननु कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः एवं त्वयि नान्यथेतो
स्ति न कर्म लिप्यते नरे विद्यां चाविद्यां च यस्तद्वेदोभयं सह। अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुत
इत्यादिश्रुतेः कर्मणैव हि संसिद्धिमास्थिता जनकादयः॥ यथान्नं मधुसंयुक्तं मधुत्वान्नेन संयुतं॥
एवं तपश्च विद्या च संयुक्तं भेषजं महदित्यादिस्मृतेश्च केवलस्य वा ज्ञानसमुच्चितस्य वा कर्मणो मुक्ति
हेतुत्वं स्यादित्याशंक्योदाहृतवाक्यस्य अज्ञपुरुषस्य पापनिवृत्तिपरत्वात् संसिद्धिशब्देन च ज्ञानसा
धनचित्तशुद्ध्यभिधानात् विद्याशब्देन चोपासनाया विवक्षितत्वात् न कर्मणो मुक्तिसाधनत्वमित्य
भिप्रायेण साधनांतरं निषेधपरं तमेव विदित्वाऽतिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति मंत्रमा

तरवाक्यमर्थतः पठति। तमेवेति॥ तं पूर्वोक्तं परमात्मानं विद्वानेव मृत्युं संसारमत्येत्यतिक्रामति इ
तरः समुच्चयरूपः केवलं कर्मरूपो वा पंथा मार्गः मोक्षोपायः न च नैव विद्यते नन्वद्वा तासु श्रुतिष्व
न्वयव्यतिरेकाभ्यामैहिकानिष्टनिवृत्तिरेव प्राधान्येनावभासते नामुष्मिकीत्याशंक्याऽऽमुष्मिकस्या
निष्टस्याभाविजन्मपूर्वकत्वात्तस्य समनिदानस्याऽभावप्रतिपादकं ज्ञात्वा देवं सर्वपाशापहानिः क्षीणैः

तमेव विद्वानत्येति मृत्युं पंथा न चेतरः॥ ज्ञात्वा देवं पाशहानिः क्षीणैः क्लेशैर्न जन्मभाक्॥८॥

क्लेशैर्जन्ममृत्युप्रहाणिरिति श्वेताश्वतरवाक्यमर्थतः पठति। ज्ञात्वेति। देवं स्वप्रकाशं प्रत्यगभिन्नं ब्र
ह्म ज्ञात्वाऽपरोक्षतयानुभूय स्थितस्य कामक्रोधादीनां सर्वेषां पाशानां हानिर्भवति तैः पाशशब्दाभि
धेयै रागादिभिः क्लेशैः क्षीणैः नष्टैर्भाविजन्महेतुकर्मारंभायोगात् तत्र प्राप्नोतीत्याशयः॥८॥ ॥ ५ ६

ननु शोकसंतारणादिफलं श्रूयते एवं नानुभूयते ज्ञानिनामपीष्टानिष्टप्राप्तिपरिहारार्थप्रवृत्तिदर्शनादि
त्याशंक्य हृदन्तापरोक्षज्ञानिनां तदभावप्रतिपादनपरमध्यात्मयोगाधिगमेन देवं मत्वा धीरो हर्षशोकौ ज
हातीति कठश्रुतिवाक्यमर्थतः पठति। देवमिति॥ धैर्यवान् ब्रह्मचर्यादिसाधनसंपन्नः देवं चिदानंदादि
लक्षणं मत्वाऽवगम्याऽत्रैवास्मिन्जन्मनि हर्षशोकौ जहाति॥ एतमेव जपेन्नेषाचिंताकर्माग्निसंभृतेषु

देवं मत्वा हर्षशोकौ जहात्यत्रैव धैर्यवान्॥ नैनं कृताकृते पुण्यपापे तापयतः क्वचित्॥९॥ ७

स्वार्थविशेषप्रदर्शनपरं नैनं कृताकृते तपत इति याज्ञवल्क्यसाध्यविध्यब्राह्मणवाक्यमर्थतः पठति
नैनमिति पूर्वमकृतं पुण्यं कृतं च पापं तत्त्वविदस्तापहेतुर्न भवति किं इदं कृतमकृतं वा पुण्यं
पापं वा तथाविधं तापकं न भवतीत्युच्यत इति विशेषः तथाहि तापो नाम चित्तविकारविशेषः पुण्यं

ब्रह्मानंद.
७

हृतं सहर्षजन्मरणो विकारमुत्पादयति च अहृतं विषादं पापं पुनस्तद्वैपरीत्येन च अहृतं हर्षमुत्पादयति
हृतं विषादं न त्वविदुस्तन्मे अपि उभयविधविकारहेतुः न कदाचिद्भवतः अविक्रियब्रह्मरूपत्वज्ञाना
दित्यभिप्रायः ॥ १९ ॥ नन्वियं सेववाक्यानि प्रमाणानि नेत्याह । इत्यादीति । आदिशब्देन हचेदवेदीदयसत्
समस्ति न चेदिहावेदीन्महती विनष्टिः यएतद्विदुरमृतास्ते भवंति अथेतरे दुःखमेवापियंति तिनद्यो या

इत्यादिश्रुतयो बह्व्यः पुराणैः स्मृतिभिः सह ॥ ब्रह्मज्ञानेऽनर्थहानिमानंदंचाप्युपघोषयन् ॥ २० ॥

देवानां प्रत्यबुध्यत स एव तदभवत्तनिचाप्येतेऽमृतसुखात्मुच्यते इत्याद्याः श्रुतयोऽस्त्येते ॥ सर्वभूतस्थ
मात्मानं सर्वभूतानि चात्मनि । संपश्यन्नात्मयाजी वै स्वाराज्यमधिगच्छति ज्ञेयं च सस्वात्मविज्ञानाद्विशुद्धिः
परमा मता इत्यादिपुराणस्मृतिवचनैः सह प्रमाणानीत्यर्थः । उदाहृतानां श्रुतिस्मृतिवाक्यानां सर्वेषां ता ७

त्पर्यमाह ॥ ब्रह्मज्ञानइति ॥ २० ॥ ननु ब्रह्मानंद इत्यानंदस्य ब्रह्मपदेन विशेषणादानंदांतरमस्तीत्यवगम्य
ते स कतिविधः कीदृशश्चानंद इत्याकांक्षायां तद्भेदप्रदर्शनपूर्वकं ब्रह्मानंदविवेचनं प्रतिजानीते ॥ आ
नंद इति । ब्रह्मानंदो विद्यानंदो विषयानंद इत्यनेन प्रकारेणास्यैव त्रिविधमवगंतव्यं तत्रेतरयोर्ब्रह्मा
नंदप्रभवत्वाद्दावधाप्य च येन ब्रह्मानंदो विभज्य प्रदर्श्यत इत्यर्थः ॥ २१ ॥ तत्राद्यो तावत्तैत्तिरीयश्रुति

आनंदस्त्रिविधो ब्रह्मानंदो विद्यासुखं तथा ॥ विषयानंद इत्यादौ ब्रह्मानंदो विविच्यते ॥ २१ ॥

पर्यालोचनाया मानंदरूपं ब्रह्मावगम्यत इत्यभिप्रायेण भृगुवल्ल्या अर्थं संक्षेपेण प्रदर्शयति । भृगुरिति
॥ भृगुनामकः पुत्रः पितुः वरुणाख्यात् ब्रह्मलक्षणं यतो वा इमानि भूतानि जायंते येन जातानि जीवं
नश्यंतिसंति तिपत्यं यंत्यभिसंविशंति तद्विजिज्ञासस्व तद्ब्रह्मेत्येवं रूपं श्रुत्वान्नमयादिकोशेषु तत्त्वलक्षणासंभवे

स्वरूपाद्यसंभवस्वरूपंजज्ञपतितत्ररस्तजअसलं १

ब्रह्मानंद॰ ८

नतेषामब्रह्मत्वंविनिश्चित्यानंदमानंदमयकोशेपंचमावयवत्वेनब्रह्मपुच्छंप्रतिष्ठेतिश्रुतंबिंबभूतमानंदं
ब्रह्मलक्षणयोजनयाब्रह्मत्वेनज्ञातवानित्यर्थः॥२२॥कथमानंदेतल्लक्षणंयोजितवानित्याशंक्यतद्योज
नाप्रकारप्रदर्शनपरमानंदाद्ध्येवखल्विमानिभूतानिजायंतेआनंदेनजातानिजीवंतिआनंदंप्रयंत्य

भृगुःपुत्रःपितुःश्रुत्वावरुणाद्ब्रह्मलक्षणं॥अन्नप्राणमनोबुद्धीस्त्यक्त्वानंदंविजज्ञिवान्॥२२॥
आनंदादेवभूतानिजायंतेतेनजीवनं॥तेषांलयश्चतत्रातोब्रह्मानंदोनसंशयः॥२३॥

भिसंविशंतीतिवाक्यमर्थतःपठतिआनंदादिति॥यास्यधर्मनिमित्तकादानंदादेवभूतानिप्राणिनोजा
यंतेउत्पद्यंतेतेनविषयभोगादिनिमित्तकेनानंदेनैवजीवनंप्राप्नुवंतितेषांप्राणिनांलयश्चतत्रैवतस्मिन्सु
षुप्तिकालीनेस्वस्वरूपभूतेआनंदएवभवतिसुषुप्तावानंदातिरेकेणकस्याप्यननुभवादतआनंदोब्रह्मैवस ८

र्वानुभवसिद्धत्वान्नात्रसंशयःकर्तव्यइतिभावः॥२३॥एवंतैत्तिरीयश्रुतिपर्यालोचनयाब्रह्मणआनंदरू
पतांप्रदर्श्यछांदोग्यश्रुतिपर्यालोचनयापितांदिदर्शयिषुःसनत्कुमारनारदसंवादरूपेसमाख्याये
स्तितस्यभूमरूपब्रह्मप्रतिपादकस्ययत्रनान्यत्पश्यतिनान्यच्छृणोतिनान्यद्विजानातिसभूमेत्यादिवाक्य नाशाद्यभावात्
स्यार्थंसंक्षेपेणाह॥भूतोत्पत्तेरिति॥भूतानामाकाशादीनांतत्कार्याणांजरायुजांडजादीनांचोत्पत्तेःप्र

भूतोत्पत्तेःपुराभूमात्रिपुटीद्वैतवर्जनात्॥ज्ञातृज्ञानज्ञेयरूपात्रिपुटीप्रलयेहिनो॥२४॥

र्वंत्रिपुटीद्वैतवर्जनात्त्रयाणांज्ञातृज्ञानज्ञेयरूपाणांपुटानामाकृतराणांसमाहारस्त्रिपुटीसैवद्वैतंतस्य
वर्जनमभावस्तस्माद्भूमादेशतःकालतोवस्तुतोवापरिच्छेदशून्यःपरमात्माभावानयनेऽभ्यानयन
मितिन्यायाद्भूमैवासीदित्यध्याहारः।नदेवद्वैतवर्जनमुपपादयति॥ज्ञातृज्ञानेति॥वक्ष्यमाणज्ञात्रादि

परत्वमानयपरसुखेसतिपरमानयइत्सेवंज्ञातेयरानयनेविनापरत्वानयनमशक्यंतदद्वैतत्वविशिष्टः आत्मा

ब्रह्मानंद॰ ए

रूपात्रिपुटीप्रलयकाले नास्तीत्येतत्सर्वं वृद्धांतसंमतमिति ॥ शिष्यस्य ज्ञानस्याभिप्रायः ॥२४॥ इदानीं साँदिस्व त्रा
रूपं दर्शयति विज्ञानेति परमात्मन उत्पन्नो बुद्ध्युपाधिको जीवो विज्ञानमयो ज्ञाता मनसि प्रतिबिंबितं म
नोमयशब्दवाच्यं चैतन्यं ज्ञानं शब्दस्पर्शादयो ज्ञेयाः प्रसिद्धाः इदं त्रयं कार्यत्वादुत्पत्तितः पुरा कारणव्यति

विज्ञानमय उत्पन्नो ज्ञाता ज्ञानं मनोमयः ॥ ज्ञेयाः शब्दादयो नैतत्त्रयमुत्पत्तितः पुरा ॥२५॥ तया
भावे तु निर्द्वैतः पूर्ण एवानुभूयते ॥ समाधिसुप्तिमूर्छासु पूर्णः सृष्टेः पुरा तथा ॥२६॥

रेकेण नास्तीत्यर्थः

॥२५॥ फलितमाह ॥ त्रयेति ॥ ज्ञात्रादित्रयाभावे द्वैतरहितः पूर्ण एवात्माऽनुभूयते ॥ कुत्रानुभूयत इत्यत आ
ह समाधीति विद्वदनुभवप्रदर्शनाय समाधिग्रहणं सर्वानुभवद्योतनाय सुप्तिमूर्छयोरुदाहरणं सुप्ता
द्युत्थितस्य द्वैतादर्शनस्मरणात्तथानुपपत्त्या निर्द्वैतस्य तदनुभवितुः सिद्धिरिति भावः भवतु सुप्त्यादाव ए

कारणव्यतिरेकेण नास्तीति नोच्यते चेत्तत्र सत्त्वादः स्यादतः कारणरूपेण तिष्ठतीत्यर्थः ४

द्वैतसिद्धिः प्रकृते किमायातमित्यत आह ॥ पूर्ण इति ॥ यथा सुप्त्यादौ परिच्छेदकाभावात्पूर्णस्तथा सृष्टेः पुरापि
तदभावात्पूर्ण इत्यर्थः ॥२६॥ अस्तु ब्रह्मणः पूर्णत्वं आनंदरूपत्वे किमायातमित्याशंक्यान्वयव्यतिरेका
भ्यामन्यतः सुखरूपत्वप्रदर्शनपरं यो वै भूमा तत्सुखं नाल्पे सुखमस्तीति वाक्यमर्थतोऽनुक्रामति ॥
योऽल्पमेति ॥ यः पूर्वोक्तो भूमा स सुखरूप एव द्वितीयदुःखहेतोरभावात् अल्पे परिच्छिन्ने तस्यैव विवरणे

योऽल्पः सोऽल्पसुखं नाल्पे सुखं त्रेधा विभेदिनि ॥ सनत्कुमारः प्राहैवं नारदायातिशोकिने ॥२७॥ सपु
राणान्पंचवेदान् शास्त्राणि विविधानि च ॥ ज्ञात्वाप्यनात्मवित्त्वेन नारदोऽतिशुशोच हि ॥२८॥ ॥

त्रेधाविभेदिनीति हेतुगर्भविशेषणं सुखं तत्र न विद्यत इत्यर्थः एवं कस्मै केनोभिहितमित्यत आह ॥ स
नत्कुमार इति नारदस्य शिष्यत्वे कारणमाह अतिशोकिन इति ॥ अतिशयितोऽधिकः शोको यस्येति अति
शोकी तस्मै ॥२७॥ तस्यातिशोकित्वे हेतुमाह सपुराणानीति नारदः पुराणैः सह वर्त्तंत इति सपुराणाः पं

चवेदाः तान्विविधानि शास्त्राणि च विदित्वाप्यात्मज्ञानरहितत्वेनातिशयेन शोकं प्राप्तः ॥१८॥ ननु वेद
शास्त्रविषयज्ञानस्य शोकनिवर्तकत्वेन प्रसिद्धस्य कथमतिशोकहेतुत्वमित्यत आह । वेदेति । तापत्र
येणाध्यात्मिकादिलक्षणेनैव शोकिता शोकोऽस्यास्तीति शोकी तस्य भावस्तत्ता आसीदित्यध्याहारः पश्चा

वेदाभ्यासातुराता पत्रयमानेण शोकिता ॥ पश्चात्त्वभ्यासविस्मारभंगगर्वैश्च शोकिता ॥१९॥
सोऽहं विद्वन्प्रशोचामि शोकपारं नयात्र मां ॥ इत्युक्तः सुखमेवास्य पारमित्यभ्यधादृषिः ॥२०॥ ॥

त्विति तुशब्दो विशेषद्योतनार्थः अभ्यासः पाठः यावर्तनं विस्मारः पठितस्य विस्मरणं भंगः स्वतोऽधिकेनति
रस्कारः गर्वोऽन्यन्यदर्शनेन स्वाधिक्यबुद्धिः एतैश्च कारणैः शोकित्वं ॥१९॥ नन्वेवं सर्वज्ञस्यापि नारदस्याति
शोकित्वं जातमिति कुतोऽवगम्येत इत्याशंक्य सोऽहं भगवः शोचामीति नारदीयादेव वाक्यादवगतमित्यभि १०

प्रेत्य तं मा भगवांछोकस्य पारं तारयत्विति तन्निवृत्त्युपायेन पृष्टे सति सनत्कुमारो भूमंशब्दवाच्यं
सुखरूपं ब्रह्मैव ज्ञायमानं शोकनिवृत्त्युपाय इति सुखं त्वेव विजिज्ञासितव्यमित्यारभ्योत्तरग्रंथसंद
र्भेणोक्तवानित्याह ॥ सोहमिति ॥२०॥ ननु स्वर्गादिजन्येषु बहुषु सुखेषु सत्सु नाल्पे सुखमस्तीत्युक्तिरनु

सुखं वैषयिकं शोकसहस्रेणावृतं त्वतः ॥ दुःखमेवेति मत्वाह नाल्पेऽस्ति सुखमित्यसौ ॥२१॥
ननु द्वैते सुखं मा भूदद्वैतेप्यस्ति नो सुखं ॥ अस्ति चेदुपलभ्येत तथा च त्रिपुटी भवेत् ॥२२॥ ॥

पपन्नेति चेत् न तेषां दुःखानुषंगेण विषसंपृक्तान्नवद्दुःखरूपत्वस्य मुनिनाभिप्रेतत्वादित्याह सु
खमिति ॥२१॥ द्वैते सुखाभावमंगीकृत्याऽद्वैतेपि तमाशंकते । नन्विति । तच्चानुपलब्धिप्रमाणयति । अ
स्ति चेदिति । अद्वैते सुखं यदि विद्येत तर्हि विषयसुखादिवदुपलभ्येत नोपलभ्यते अतो नास्तीत्यर्थः ननूप

ज्ञप्तएवेत्याशंकमाने प्रमाह। तथा चेति। अनुभवस्यानुभवितुर्नुभाव्यसापेक्षत्वादद्वैतहानिरिति भा
वः॥२२॥ अद्वैतस्य सुखाधिकरणत्वनिषेधमंगीकरोति सिद्धांतामास्त्विति। तत्र हेतुमाह किंत्विति। हि
यस्मात्कारणादद्वैतमेव सुखमतः सुखाधिकरणेन भवतीत्यर्थः॥ अद्वैतं सुखमित्यत्र किं प्रमाणमि

((किं मानमिति चेन्नास्ति मानाकांक्षा स्वयंप्रभे)) मास्त्वद्वैते सुखं किंतु सुखमद्वैतमेव हि॥ किं मान
मिति चेन्नास्ति मानाकांक्षा स्वयंप्रभे॥२३॥ स्वप्रभत्वे भवद्वाक्यं मानं यस्माद्भवानिदं॥ अद्वैतमनुपेत्या
स्मिन्सुखं नास्तीति भाषते॥२४॥

त्याशंकानुवादपूर्वकं तस्य स्वप्रकाशत्वात्प्रमाणप्रश्न एवानुपपन्न इ
त्याह किंमानमिति॥२३॥ ननु स्वप्रकाशत्वेऽपि किं प्रमाणमित्याशंक्य त्वदीयमेव वचनं प्रमाणमित्याह स्वप्र
भत्व इति। तदुपपादयति यस्मादिति। यतः कारणात्त्वं भवता प्रमाणनैरपेक्ष्येणाद्वैतमनुपेत्य सुखमेवास्मि ११

न्नेऽतः स्वप्रभत्वमित्यर्थः॥२४॥ न मयाऽद्वैतमभ्युपगम्यते किंतु त्वदुक्तमद्वैतमनूद्य दूष्यतेऽतो नोक्तसिद्धि
रिति शंकते। नाभ्युपैमीति विकल्पासहत्वाद्द्वैतानभ्युपगमोऽनुपपन्न इति मन्वानः पृच्छति तदेति॥२५॥
किंशब्दसूचितं विकल्पं दर्शयति किमद्वैतमिति तृतीयं पक्षं निराकरोति। अंतिम इति। द्वैताद्वैतविल

नाभ्युपैम्यहमद्वैतं त्वद्वचोऽनूद्य दूषणं॥ ब्रवीमीति चेत्तदा ब्रूहि किमासीद्द्वैततः पुरा॥२५॥ किमद्वै
तमुत द्वैतमन्यो वा कोटिरंतिमः॥ अप्रसिद्धो न द्वितीयोऽनुत्पत्तेः शिष्यतेऽग्रिमः॥२६॥ ॥ ॥

क्षणस्वरूपस्य लोकेऽदर्शनादिति भावः। द्वितीयं पक्षं निराकरोति। न द्वितीय इति। तत्र हेतुमाह अनुत्प
त्तेरिति द्वैतस्य तदानीमनुत्पन्नत्वादिति भावः। अतः प्रथमः पक्षः परिशिष्यत इत्याह शिष्यत इति॥२६॥
नन्वन्येन प्रकारेणाऽद्वैतं सुखमेव सिद्धं तिनानुभवो नेति चोदयति। अद्वैतेति॥ ॥

ब्रह्मानंद० १२ अद्वैतसिद्धिर्युक्त्यैवेत्युक्ते विकल्पासहत्वादनुपपन्नमिति मन्वानो युक्तिं विकल्पयति सिद्धांती॥ वदेति वि
कल्पस्यपूर्वनतो निराकरोति कोटिरिति॥२७॥ प्रथमपक्षं सोपहासं निराकरोति॥ नानुभूतिरिति॥ अद्वै

अद्वैतसिद्धिर्युक्त्यैव नानुभूत्येति चेद्वद॥ निर्दृष्टांता सदृष्टांता वा को ऽन्तरमत्र नो॥२७॥ ना
नुभूतिर्न दृष्टांत इति युक्तिस्तु शोभते॥ सदृष्टांतत्वपक्षे तु दृष्टांतं वद मे मतं॥२८॥ ब ॥

न सिद्धिर्युक्त्यैवेति वदता ऽनुभूतिस्तावत्त्वा ऽभ्युपेयते युक्तिस्तु दृष्टांतप्रदर्शनमंतरेण न किंचित्साधय
सतो न दृष्टांत इत्युक्तिरयुक्तेति भावः द्वितीये विकल्पे उभयवादिसंमतिपन्नो दृष्टांतो वक्तव्य इत्याह १२
सदृष्टांतत्वेति॥२८॥ ॥

तर्हि दृष्टांतेनैव द्वैतं साधयामीति शंकते पूर्ववादी अद्वैत इति॥ प्रलयो द्वैतरहितो भवितुमर्हति द्वैतानुपल
ब्धिमत्वात् यो यो द्वैतानुपलब्धिमान् स स द्वैतरहितः यथा स्वाप इति॥ नन्वेवं साधयतस्तव स्वसुषुप्ति
दृष्टांतः परसुषुप्तिर्वा आद्ये तस्याः परं प्रत्यप्रसिद्धत्वेन तत्सिद्धये दृष्टांतांतरं वक्तव्यमित्याह॥ सुप्ति

अद्वैतप्रलयो द्वैतानुपलंभेन सुप्तिवत्॥ इति चेत्सुप्तिरद्वैतेत्यत्र दृष्टांतमीरय॥२९॥ दृष्टां
तः परसुप्तिश्चेदहो ते कौशलं महत्॥ यः स्वसुप्तिं न वेत्त्यस्य परसुप्तौ तु का कथा॥३०॥

रिति॥२९॥ ननु तस्याः परसुप्तिरेव दृष्टांत इति द्वितीयविकल्पमाशंकते दृष्टांत इति॥ परसुप्तेस्तवाप्र
सिद्धत्वेन त्वया दृष्टांतीकरणमनुपपन्नमिति॥ सोपहासमाह सिद्धांती॥ अहो इति॥ यो भवान्सुप्तेरनु
भवगम्यत्वानंगीकारेण स्वसुप्तिमपि न वेत्ति अस्य तव परसुषुप्तौ का कथा परसुप्तिज्ञानं न भवतीति

किंतु वक्तव्यमिति भावः॥ ३०॥ ननु त्वनुमानात्परस्य सुप्तिसिद्धिरिति शंकते। निश्चेष्टत्वादिति। विमतः परः सु
प्तो भवितुमर्हति प्राणादिमत्त्वे सति निश्चेष्टत्वान्मदादिवदनुमानादित्यर्थः। एवं तर्हि न वसुप्तेः स्वप्रका
शत्वे परिशिष्यत इत्याह सिद्धांती। न देति। तदा तर्हि मां प्रति स्वां सुप्तिमुदाहर्तुं दृष्टांतीकर्तुं तेन वसु

निश्चेष्टत्वात्परः सुप्तो यथाहमिति चेन्न हि। उदाहर्तुं सुषुप्तेस्ते स्वप्रभत्वं बलाद्भवेत्॥३१॥
नेंद्रियाणि न दृष्टांतस्तथाप्यंगीकरोषि तां॥ इदमेव स्वप्रभत्वं यज्ज्ञानं साधनैर्विना॥३२॥

सुप्तेः सुप्तेः स्वप्रभत्वं स्वप्रकाशत्वं बलात्तु सुप्त्युदाहरणसामर्थ्यादेव भवेत्॥३१॥ कथं बलाद्भवतीत्या
शंक्याह। नेति। सुप्तिग्राहकाणींद्रियाणि न संति तेषां स्वकारणे विलीनत्वात् दृष्टांतश्च संप्रतिपन्नो नास्ति १३
परसुप्तेरप्रसिद्धत्वस्योक्तत्वात् तथापि तां सुप्तिमंगीकरोषि एवं च सति साधनैर्विना ज्ञानसाधनमंतरेणापि

ज्ञाने२

आत्मवत् प्राभाकराभिमत

ज्ञाने प्रकाशनमिति। यदिदमेव स्वप्रकाशत्वं तत्सुषुप्त्या इत्यर्थः॥ अयं प्रयोगः विमता सुप्तिः स्वप्रकाशा
असत्यपि ज्ञानसाधने सुप्रकाशमानत्वात् अस्मदाद्यभिमततुर्यसंवेदनवत् बौद्धाभिमतस्वात्मवदि २।२
त्यर्थः॥३२॥ इत्थं प्रत्यक्षदृष्टांतत्वेनोदाहृतायाः सुषुप्तेरद्वैतत्वं स्वप्रभत्वं च प्रसाध्य तच्च सुखप्रसाधना
य पूर्वप्रश्निनः आकांक्षामुत्थापयति। स्तामिति। सुखप्रतियोगिनो दुःखस्य तदानीमसत्त्वात् सुखमेव प

स्तामद्वैतस्वप्रभत्वे वद सुप्तौ सुखं कथं॥ एवं दुःखं तदा नास्ति ततस्तेऽशिष्यते सुखं॥३३॥

रिशिष्यत इत्याह॥ एवमिति। सुखदुःखयोः प्रकाशतमसोरिव परस्परविरोधित्वाद्दुःखाभावे सुखमे
वावशिष्यतमिति भावः॥३३॥ सुप्तौ दुःखाभावे किं मानमित्याकांक्षायां प्रत्यक्षमनुभवाविस्ताह॥ अंधइ
ति॥ तस्मात्कारणं सेतुं तीर्त्वा अंधः सन्ननंधो भवति विद्धः सन्नविद्धो भवत्युपतापी सन्ननुपतापी भवे

ब्रह्मानंद० तिन्द्रयपीदं भगवः शरीरमंधं भवत्यनंधः सन्भवतीत्यादिश्रुतिर्देहाभिमानप्रयुक्तांधत्वादीन्दोषान्स्व
२४ प्नो निवारयति व्याध्यादिना पीड्यमानस्यापि मुमुक्षोर्न दुःखानुभवो नास्तीत्येतत्सर्वजनप्रसिद्धं चेत्यर्थः
॥३४॥ ननु यद्दुःखाभाववत्तत्सुखमित्यस्याः व्याप्तेर्लोष्टादौ व्यभिचार इति शंकते। नदुःखेति दुःखा

ऽंधः सन्नप्यनंधः स्याद्विद्धोऽविद्धो यरोग्यपि॥ अरोगीति श्रुतिः प्राह तच्च सर्वे जना विदुः॥
३४॥ न दुःखाभावमात्रेण सुखं लोष्टशिलादिषु॥ द्वयाभावस्य दृष्टत्वादिति चेद्विषमं वचः॥
३५

भावमात्रेण सुखं कल्पयितुं न शक्यते लोष्टशिलादिषु द्वयाभावस्य सुखदुःखयोरभावस्य दर्श
नादित्यर्थः॥ दृष्टांतदार्ष्टांतिकयोर्वैषम्यान्मैवमिति परिहरति विषममिति। वचो दृष्टांतवचनं विष
मं दार्ष्टांतिकाननुसारीत्यर्थः॥ ३५॥ दृष्टांतस्याननुकूलत्वमेवोपपादयति। मुखेति। अस्य निःस्पो २४

दुःखसुखयोरूहनं यथाक्रमं मुखदैन्यविकाशाभ्यां लिंगाभ्यां कर्तव्यम् अयं दुःखी विषण्णवदनत्वात् संप्रतिप
न्नवत् अयं सुखी प्रसन्नवदनत्वात् संप्रतिपन्नवदित्यर्थः॥ भवत्वेवं लोके ऊहनं ते किमायातमित्यत
आह दैन्येति। लोष्टादौ मुखदैन्यादिलिंगाभावात् दुःखसुखयोरूहनमेव न संभवति अतस्तत्र दुःखा

मुखदैन्यविकासाभ्यां परदुःखसुखोहनं॥ दैन्याद्यभावतो लोष्टे दुःखाद्यूहा न संभवेत्॥ ३६॥ स्व
कीये सुखदुःखे तु नोहनीये ततस्तयोः॥ भावो वेद्योऽनुभूत्यैव तदभावोऽपि नान्यतः॥ ३७॥ ॥

भावोऽपि न निश्चेतुं शक्यत इत्यर्थः॥ ३६॥ इदानीं परकीयसुखदुःखाभ्यां स्वकीयसुखदुःखयोर्वैषम्यं दर्शय
ति॥ स्वकीयेति। स्वनिष्ठयोस्तु सुखदुःखयोरनुभवसिद्धत्वान्नानुमेयत्वं यतस्ततस्तयोः सुखदुःखयो
र्भावः सद्भावो यथानुभूत्यैव वेद्यः प्रत्यक्षेणावगम्यते तथा तदभावोऽपि तयोः सुखदुःखयोरभावोऽप्य-

ब्रह्मानंद॰ २५

स्ततोऽस्मादनुमानादेनावगम्यते किंतुप्रत्यक्षेणैवेत्यर्थः॥३७॥फलितमाह।तथासतीति।तथासति
स्वकीयस्यदुःखादेरनुभवगम्यत्वेसतिस्वसुप्तौस्वकीयसुप्तावपिविद्यमानोदुःखाभावोऽनुभवेनैव
सिद्धः ततोपिकिंतत्राह विरोधीति॥सुप्तौसुखविरोधिनोदुःखस्याभावान्निर्विघ्नंबाधरहितंसुखमि

तथासतिस्वसुप्तौचदुःखाभावोऽनुभूयते॥विरोधिदुःखराहित्यात्सुखंनिर्विघ्नमिष्यतां॥
३८॥महत्तरप्रयासेनमृदुशय्यादिसाधनं॥कुतःसंपाद्यतेसुप्तौसुखंचेत्तन्नभवेत्॥३९

ष्यतामभ्युपेयतां॥३८॥शय्यादिसुखसाधनसंपादनान्यथानुपपत्त्यापिसुप्तौसुखमस्तीत्यवगम्य
तइत्याह॥महत्तरेति॥तत्रतस्यांसुप्तौसुखंनभवेच्चेन्महत्तरप्रयासेनबहुवित्तव्ययशरीरपीडादि
नामृदुतूलशय्यादिकशिपुमंचादिसाधनंसुखसाधनंकुतःकस्मात्कारणात्संपाद्यतेनकुतोपीत्यर्थः २५
३९

अर्थापत्तेरन्यथोपपत्तिंशंकतेदुःखेति।एतच्छय्यादिसाधनसंपादनंदुःखनिवृत्तिफलकंननियतमितिप
रिहरति॥रोगिणइति।रोगादिदुःखेसतितन्निवृत्तयेतद्भवतुतदभावेतुनिवर्त्यदुःखाभावात्तत्सं
पादनंसुखायैवेत्यवगम्यतइत्यर्थः॥४०॥ननुसौषुप्तसुखस्यशय्यादिसाधनजन्यत्वेआत्मस्वरूपेणा

दुःखनाशार्थमेवैतदितिचेद्रोगिणस्तथा॥भवत्वरोगिणस्त्वेतत्सुखायैवेतिनिश्चिनु॥४०॥
तर्हिसाधनजन्यत्वात्सुखंवैषयिकंभवेत्॥भवत्येवात्रनिद्रायाःपूर्वंशय्यासनादिजं॥४१॥नि
द्रायांतुसुखेयत्तज्जन्यतेकेनहेतुना॥

हमेतेतिशंकते तर्हीति।किंनिद्रागमनात्पूर्वकालीनस्य
विषयजन्यत्वमुच्यतेउतनिद्राकालीनस्येतिविकल्प्याद्यमंगीकरोतिभवत्विति॥४१॥द्वितीयंनिराक
रोति।निद्रायामिति॥सुषुप्तौशय्याद्यनुसंधानाभावात्तज्जन्यत्वंतस्यनसंभवतीतिभावः॥ ॥ ॥

ननु निद्रायां मज्जनं सुखं यद्यस्ति तर्हि तद्विषयसुखवत्कुतो नानुभूयत इत्याशंक्यानुभवितुस्तदा तस्मिन्निम
ग्नत्वान्न विषयसुखवत्तदनुभव इत्यभिप्रायेणाह ॥ सुखेति ॥ आदौ निद्रायाः पूर्वस्मिन्काले जीवः सुखाभि
मुखधीः शय्यादिजन्यसुखाभिमुखी बुद्धिर्यस्य स तथोक्तः तथाविधो भवति पश्चान्निद्राकाले परे उत्कृष्टे

सुखाभिमुखधीरादौ पश्चान्मज्जेत्परे सुखे ॥ ४२ ॥ जाग्रद्व्यापृतिभिः श्रांतो विश्रम्याय विरोधिनि ॥
अपनीते स्वस्थचित्तोऽनुभवेद्विषये सुखं ॥ ४३ ॥ आत्माभिमुखधीवृत्तौ स्वानंदः प्रतिबिंबति ॥ ॥

सुखे स्वरूपसुखे मज्जेत् विलीनो भवेत् ॥ ४२ ॥ संक्षेपेणोक्तमर्थं श्लोकत्रयेण प्रपंचयति ॥ जाग्रद्व्यापृतिभिरि
त्यादिना ॥ जीवो जाग्रद्व्यापृतिभिः जागरणावस्थायां क्रियमाणैर्व्यापारविशेषैः श्रांतो विश्रम्य मृदुशय्या
दौ शयनं कृत्वा अथानंतरं विरोधिनि व्यापारजनिते दुःखे अपनीते निवारिते सति स्वस्थचित्तः अना १६

कुलमना भूत्वा शय्यादौ विषये जायमाने सुखमनुभवेत्तावता कुर्यात् ॥ ४३ ॥ विषयसुखे कीदृशमित्याकां
क्षायां तत्स्वरूपं प्रदर्शयन् परे सुखे निमज्जननिमित्तत्वेन तदनुभवे विश्रमं दर्शयति ॥ आत्मेति ॥ अना
गतविषयसंपादनादिना दुःखमनुभूय तन्निवृत्त्यर्थं मृदौ शय्यादौ शयानस्य बुद्धिरंतर्मुखा भवति तस्यां

अनुभूयैनमत्रापि त्रिपुट्या श्रांतिमाप्नुयात् ॥ ४४ ॥ तच्छ्रमस्यापनुत्यर्थं जीवो धावेत्परात्मनि ॥
तेनैक्यं प्राप्य तत्रत्यो ब्रह्मानंदः स्वयं भवेत् ॥ ४५ ॥ दृष्टांताः शकुनिः श्येनः कुमारश्च महान्नृपः ॥

द्बुद्धिवृत्तौ स्वरूपभूत आनंदः स्वाभिमुखे दर्पणे मुखमिव प्रतिबिंबति एवं हि विषयानंदोऽत्रापि
अस्यामपि वेलायां एनं विषयानंदमनुभूय अनुभवि[illegible]अनुभवानुभाव्यलक्षणया त्रिपुट्या श्रम
माप्नुयात् ॥ ४४ ॥ ततः किं तत्राह तच्छ्रमस्येति ॥ तस्यास्त्रिपुटीदर्शनजनितस्य श्रमस्यापनोदाय समरणजी

ब्रह्मानंद० १७

वः परमात्मानंदरूपे ब्रह्मणि धावेच्छीघ्रं गच्छेत् कृत्वा च तेन ब्रह्मणैकतां तादात्म्यं गत्वा सता सोम्य तदा संपन्नो भवतीति श्रुतेः स्वयमपि तत्र सन्नस्य सुषुप्तोस्थितो ब्रह्मानंदो भवेत् ॥४५॥ अस्मिन्नुपपादिते सौषुप्ते आनंदे शकुन्यादयो बहवो दृष्टांताः श्रुत्या विधीयंत इत्याह दृष्टांता इति। शकुन्यादिभिः पंचभिर्दृष्टांतैः सुप्तावानंदोपपादनेन तत्र सुखं नास्तीति मतं निराकृतं ॥४६॥ नचैतावत्स्यपया

महाब्राह्मणाऽइमे ते सुप्त्यानंदे कृतिरिताः ॥४६॥ शकुनिः सूत्रबद्धः सन्दिक्षु व्यापृत्य विश्रमं ॥
अलब्ध्वा बंधनस्थानं हस्तस्तंभाद्युपाश्रयेत् ॥४७॥

शकुनिः सूत्रेण पदबद्धो दिशं दिशं पतित्वाऽन्यत्रा यतनमलब्ध्वा बंधनमेवोपाश्रयते प्राण बंधनं हि सोम्य मन इत्यस्य दृष्टांतं तु द्वाभ्यां निरूपयति पादद्वयं परस्प छांदोग्यश्रुतिवाक्यस्यार्थं संक्षेपेण दर्शयति श्लोकद्वयेन शकुनिरित्यादिना। हस्तादेः कचिदाधारे सूत्रेण १७

बद्धः शकुनिः पक्षी आहारादिग्रहणाय दिक्षु प्राच्यादिषु व्यापारं कृत्वा तत्र विश्रमं विश्रम्यतेऽस्मिन्निति विश्रमः आधारस्तमलब्ध्वा बंधनस्थानं हस्तादिकमेव यथाश्रयेत् ॥४७॥ तथा जीवोपाधिभूतं मनोपि पुण्यपुण्यफलयोः सुखदुःखयोरनुभवाय स्वप्नजाग्रदवस्थयोस्तत्र तत्र भ्रांत्वा भोगप्रदे कर्मणि क्षीणे सति स्वो

जीवोपाधिर्मनस्तद्वद्धर्माधर्मफलाप्तये ॥ स्वप्ने जाग्रति च भ्रांत्वा क्षीणे कर्मणि लीयते ॥४८॥
श्येनो वेगेन नीडैकलंपटः शपितुं व्रजेत् ॥ जीवः सुप्तौ तथा धावेद्ब्रह्मानंदैकलंपटः ॥४९॥

पादाने अज्ञाने विलीयते लक्षये च तदुपहितो जीवः परमात्मैव भवतीत्यर्थः ॥४८॥ इदानीं श्येनदृष्टांत प्रपंचनपरस्य तद्यथास्मिन्नाकाशे श्येनो वा सुपर्णो वा विपरिपत्य श्रांतः संहत्य पक्षौ संलयायैवाव ध्रियत एवमेवायं पुरुष एतस्मा अंताय धावति यत्र सुप्तो न कंचन कामं कामयते न कंचन स्वप्नं पश्यती २

द्वा

तस्य बृहदारण्यकवाक्यस्यार्थं संक्षिप्याह ॥ श्येन इति ॥ यथा आकाशे सर्वतः प्रचरन् श्येनः एतन्नामा प
क्षी गगने संचारनिमित्तश्रमपरिहाराय शयितुं शयनं कर्तुं नीडं कुलायं प्रतिः कुलाये काभिलाषया प्र
धावन्वर्तते शीघ्रं गच्छेत् तद्वद् जीवोऽपि देवमनउपाधिकस्वाप्नाभासो विश्रांत्यानंदैकाभिलाषया प्रधावन्स्वापाय
शीघ्रं गच्छेदित्याकाशमिति शेषः ॥ ४९ ॥ स यथा कुमारो वा महाराजो वा महाब्राह्मणो वातिशयमा

अतिबालस्तनं पीत्वा मृदुशय्यागतो हसन् ॥ रागद्वेषाद्यनुत्पत्तेरानंदैकस्वभावभाक्
॥ ५० ॥

नंदस्य गत्वा शयीतैवमेवैष एतच्छेत इति कुमारादिदृष्टांतत्रयप्रदर्शनपरं वाक्यं किंबालक्रमेण गतं वाक्यं
श्लोकत्रयेण व्याचष्टे ॥ अतिबाल इत्यादिना यथा स्तनंधयः शिशुः रागलं स्तनं पीत्वा मृद्वादियोगिनि तल्पे
शायिनः स्वकीयादित्यानन्तरत्वेन रागादिरहितः सन् सुखमूर्तिरवतिष्ठते ॥ ५० ॥ यथा वा सार्वभौमो राजा १८

विशारदबुद्धित्वेपि सर्वैर्मानुषानंदैर्युक्तत्वात्प्रार्थनीयाभावेन रागादिरहित आनंदमूर्तिर्वावतिष्ठते ॥ ५१
॥ यथा वा महाविप्रो महाब्राह्मणः प्रत्यगभिन्नब्रह्मसाक्षात्कारवानहं कृतकृत्य इत्येवंरूपां विद्यानंदस्य प
रमां सीमां जीवन्मुक्ततां प्राप्तः परमानंदस्वरूप एवावतिष्ठते तथायमप्यानंदरूपस्तिष्ठतीति शेषः ॥ ५२ ॥

महाराजः सार्वभौमः संतृप्तः सर्वभोगतः ॥ मानुषानंदसीमानं प्राप्यानंदैकमूर्तिभाक् ॥ ५१ ॥ महा
विप्रो ब्रह्मवेदी कृतकृत्यत्वलक्षणम् ॥ विद्यानंदस्य परमां काष्ठां प्राप्यावतिष्ठते ॥ ५२ ॥ मुग्धबुद्धातिबु
द्धानां लोके सिद्धा सुखात्मता ॥ उदाहृता नामन्येतु दुःखिनो न सुखात्मकाः ॥ ५३ ॥ ॥

नन्वेते कुमारादयस्तु
एव किमिति दृष्टांतीकृताः नान्य इत्याशंक्य दृष्टांतत्रयोदाहरणत्वतात्पर्यमाह ॥ मुग्धेति ॥ विवेकशून्या
नाम मुग्धेति बालः सुखी विवेकिषु सार्वभौमोऽतिविवेकिषु आनंदात्मसाक्षात्कारवानेव इतरे तु सर्वदा रा

गादिमत्वाद्यसुखिन इति न दृष्टांतीकृता इत्यर्थः॥५३॥भवत्वेते सुखिनः प्रत्यक्षं ते किमायातमित्याशंक्य दार्ष्टांतिक
श्रुतिवाक्यस्य तात्पर्यमाह॥कुमारादिवदिति॥कुमारादिवत्कुमारादयो यथा आनंदभाजस्तथैवायमपि सुषुप्तः ब्र
ह्मानंदैकतत्परः ब्रह्मानंदैकभागित्यर्थः ब्रह्मानंदैकपरत्वे युक्तिप्रदर्शनपरं तद्यथा प्रियया स्त्रिया संपरिष्व
क्तो न बाह्यं किंचन वेद नांतरमेवमेवायं पुरुषः प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किंचन वेद नांतरमिति श्रौ

कुमारादिवदेवायं ब्रह्मानंदैकतत्परः॥स्त्रीपरिष्वक्तवद्वेद न बाह्यं नापि चांतरं॥५४॥ ॥

तिर्ब्राह्मणगतं वाक्यमर्थतोऽनुक्रामति स्त्रीति। यथा लोके प्रियया स्त्रियालिंगितः कामी बाह्याभ्यंतरविष
यज्ञानशून्यत्वात्सुखमग्नो भवति तथा सुप्तो प्राज्ञेन परमात्मनैक्यं गतो जीवो बाह्यादिविषयज्ञानाभावादा
नंदमग्न एव भवति॥५४॥अत्र दृष्टांतदार्ष्टांतिकवाक्यस्थयोर्बाह्याभ्यंतरशब्दयोर्विवक्षितमर्थं क्रमेण दर्शयति॥ १८

बाह्यमिति॥हृत्स्थेत्यांतः॥नाडीस्थः जाग्रद्वासनया नाडीमध्ये प्रतीयमानप्रपंचः स्वप्नमुच्यते॥५५॥जीवः सुप्तौ
सानंदरूपेणैवावतिष्ठत इत्यत्र युक्तिप्रदर्शनपरायाः अत्र पिताऽपिता भवतीत्यादिकायाः श्रुतेस्तात्पर्य
माह। पितापीति। अत्र सुप्तावध्यासिकानां पितृत्वादिजीवधर्माणां श्रुत्यैव निवारितत्वात् जीवत्वाप्रतीतो

बाह्यं रथ्यादिकं हृत्स्थं यद्दृष्टं संतथांतरं॥ तथा जागरणं बाह्यं नाडीस्थः स्वप्न आंतरः॥५५॥पितापि सु
प्तावपितेत्याहैवं जीवत्ववारणात्॥सुप्तौ ब्रह्मैव नो जीवः संसारित्वासमीक्षणात्॥५६॥पितृत्वाद्य
भिमानो यः सुखदुःखाकरः स हि॥तस्मिन्नपगते तीर्णः सर्वशोकान्भवत्ययं॥५७॥

ब्रह्मैवावशिष्यत इ
त्यर्थः॥५६॥ननु पितृत्वाद्यभिमानाभावेपि सुखित्वादिसंसारः किं न स्यादित्याशंक्य संसारस्य देहाभिमानमूल
त्वात्तदभावेऽभाव इति मत्वाऽनुक्तत्वप्रतिपादकं तीर्णो हि तदा सर्वान्छोकान्हृदयस्य भवतीति मंत्रांतरवाक्य

तात्पर्यतो व्याचष्टेपि तत्त्वोक्तिरिति ॥५७॥ ननूदाहृताभिः श्रुतिभिर्न सुखप्राप्तिर्मुखतोभिधीयमानोपलभ्यत इ-
त्याशंक्य तत्याभिधानपरकैवल्यश्रुतिवाक्यमर्थतः पठति सुषुप्तीति ॥ सकले जाग्रदादिजनके प्रपंचे वि-
लीने स्वोपादानभूतायां तमःप्रधानायां प्रकृतौ विलयं गते सति तमसा तया प्रकृत्याऽऽवृतत्वयाच्छादितो जी-

सुषुप्तिकाले सकले विलीने तमसावृतः ॥ सुखरूपमुपैतीति ब्रूते ह्याथर्वणी श्रुतिः ॥५८॥ सुख-
मस्वाप्समत्राहं नैव किंचिदवेदिषं ॥ इति द्वेधा सुखाज्ञाने परामृशति चोत्थितः ॥५९॥

वः सुखरूपं ब्रह्मो-
पैतीति तस्याः श्रुतेरर्थः ॥५८॥ न केवलमयं श्रुतिसिद्धोर्थः किंतु सर्वानुभवसिद्धोपीत्याह सुखमिति सुषुप्ता-
दुत्थितः पुरुषः एतावंतं कालं सुखमस्वाप्सं न हि किंचिदवेदिषमित्येवं निशाकालीने सुखाज्ञाने परामृ-
शति स्मरति अतोपि सुषुप्तौ सुखमस्तीति अवगम्यते ॥५९॥ ननु परामर्शस्याप्रमाणत्वात्कथं तत्सु-

खसिद्धिरित्याशंक्य तस्याप्रमाणेपि तन्मूलभूतानुभवबलात्तत्सिद्धिरित्यभिप्रायेणाह ॥ परामर्श इति
॥ परामर्शः स्मरणं ज्ञानं अनुभूत एव विषये भवति नाऽननुभूतविषय इत्यस्मात् हेतोस्तदा सुप्तौ अनु-
भव आसीदित्यवगम्यते ननु सुप्तौ मनःसहितानां ज्ञानकरणानां विलीनत्वात्कथमनुभवसिद्धिरित्या-
शंक्य किं सुखानुभवसाधनं नास्तीत्युच्यते ऽज्ञानानुभवसाधनं वा नाद्यः स्वप्रकाशचिद्रूपत्वेन सुखस्य

परामर्शोऽनुभूतेऽस्ति ह्यासीदनुभवस्तदा ॥ चिदात्मत्वात्स्वतो भाति सुखमज्ञानधीस्ततः ॥६०॥

करणानपेक्षत्वात् न द्वितीयः स्वप्रकाशसुखबलादेव तदावरकाज्ञानप्रतीतिसिद्धेरित्यभिप्राये-
णाह ॥ चिदात्मत्वादिति ततः स्वप्रकाशसुखात् अज्ञानधीरज्ञानस्य प्रतीतिर्भवतीति ॥६०॥ ननु सौषुप्तसुख-
स्य स्वप्रकाशसुखत्वेपि ब्रह्मानंदः स्वयं भवेदित्युक्तं ब्रह्मस्वरूपत्वं न संभवति मानाभावादित्याशंक्याह वि-

ज्ञानमानंदमित्यादिबृहदारण्यकवाक्यसद्भावान्मैवमित्याह ॥ ब्रह्मेति ॥ ६१ ॥ नन्वनुभवस्मरणयोरेका
धिकरणत्वनियमात्सुखमहमस्वाप्सं न किंचिदवेदिषमिति च सोप्तोत्थस्य सुखाज्ञानयोर्विज्ञानमयशब्दवा
च्येन जीवेन स्मर्यमाणत्वात्तस्यैव सुखाद्यनुभवितृत्वं वक्तव्यमित्याशंक्य नूपाधेर्विज्ञानस्याज्ञानका
र्यस्याज्ञाने विलीनत्वान्मैवमित्यभिप्रायेणाह ॥ यदज्ञानमिति ॥ न किंचिदवेदिषमिति स्मरणान्यथा

ब्रह्मविज्ञानमानंदमिति वाजसनेयिनः ॥ पठंत्यतः स्वप्रकाशं सुखं ब्रह्मैव नेतरत् ॥ ६१ ॥ यद
ज्ञानं तत्र लीनौ तौ विज्ञानमनोमयौ ॥

नुपपत्त्याऽगम्यमानं यदज्ञानमस्ति तत्र तस्मिन्नज्ञाने तौ प्रमातृप्रमाणत्वेन प्रसिद्धौ विज्ञानमनोमयौ ली
नौ विज्ञानत्वाद्याकारं परित्यज्य कारणरूपेणावस्थितौ अतस्तदुपाधिकस्य नानुभवितृत्वमिति
भावः ॥ ॥ तत्रोपपत्तिमाह तयोर्हीति ॥ हि यस्मात्कारणात्तयोर्विज्ञानमनोमययोर्विलयावस्थानि २१

द्रेत्युच्यते विज्ञानविरतिः सुप्तिरित्यभिधानात् तर्हि निद्रायामेव विलीनाविति वक्तव्यमित्याशंक्या
ह ॥ अज्ञानं चेति ॥ सैव निद्रा विद्वद्भिरज्ञानमिति व्यवह्रियत इत्यर्थः ॥ ६२ ॥ ननु तर्हि सोप्तोत्थस्य सुखाद्यनुभ
वकालेऽसतो विज्ञानमयस्य प्रबोधे कथं तत्स्मर्तृत्वमित्याशंक्य विलयावस्थायामपि न स्वरूपनाशा

तयोर्हि विलयावस्था निद्राज्ञानं च सैव हि ॥ ६२ ॥ विलीनघृतवत्पश्चा
त्स्याद्विज्ञानमयो घनः ॥ विलीनावस्थयानंदमयशब्देन कथ्यते ॥ ६३ ॥
आ

भावात्तद्विलयावस्थोपाधिमदानंदमयरूपनाशाभावाद्विलयावस्थास्योपाधिमदानंदमयरूपेणानुभवि
तृत्वं विज्ञानशब्दवाच्यघनीभावोपाधिमत्त्वेन स्मर्तृत्वं च एकस्य घटत इत्यभिप्रायेणाह विलीनेति तथा
ग्निसंयोगादिना विलीनं घृतं पश्चाद्वाय्वादिसंबंधवशात् घनीभवत्येवं जाग्रदादिप्रभोगप्रदस्य कर्मणः

ब्रह्मानंद॰
२२

क्षयवशान्निद्रारूपेणविलीनमंतःकरणंपुनर्भोगप्रदकर्मवशात्प्रबोधेविज्ञानाकारेणघनीभवत्सतःतदु
पाधिकात्मापिविज्ञानमयोमनःस्यात्सएवपूर्वविलयावस्थोपाधिकःसन्नानंदमयइत्युच्यते॥६३॥विली
नावस्थआनंदमयइत्युक्तमेवार्थंस्फुटीकरोति॥सुप्तीति॥सुप्तेःपूर्वस्मिन्नव्यवहितेक्षणेयाअंतर्मुखाबुद्धि

सुप्तिपूर्वक्षणेबुद्धिवृत्तिर्यासुखबिंबिता॥सैवतद्बिंबसहितालीनानंदमयस्ततः॥६४॥

वृत्तिःस्वरूपभूतस्रुखप्रतिबिंबयुक्ताभवतिततोऽनंतरंतत्प्रतिबिंबसहितासैववृत्तिर्निद्रारूपेणविली
नाआनंदमयइत्यभिधीयते॥६४॥एवमानंदमयस्वरूपंप्रदर्श्यतस्यैवप्रबोधकालेविज्ञानमयरूपेण
स्मर्तृत्वमिष्यतेतदानींसुखानुभवमुपपादयति॥अंतर्मुखइति॥सुखप्रतिबिंबसहितांतर्मुखधीवृत्तिज २२

नितसंस्कारसहिताज्ञानोपाधिकोयआनंदमयस्तदासुषुप्तौब्रह्मसुखंस्वरूपभूतंसुखंचिदाभाससंहिता
भिरज्ञानाद्युत्पन्नाभिःसुखादिगोचराभिर्वृत्तिभिःसत्वपरिणामविशेषैर्भुंक्तेऽनुभवति॥६५॥ननुतर्हिजा
गरणइवतदानींसुखमनुभवामीत्यभिमानःकुतोनस्यादित्याशंक्याऽविद्यावृत्तीनांबुद्धिवृत्तिवत्स्पष्टत्वाभा

अंतर्मुखोयआनंदमयोब्रह्मसुखंतदा॥भुंक्तेचिद्बिंबयुक्ताभिरज्ञानोत्पन्नवृत्तिभिः॥६५॥अज्ञा
नवृत्तयःसूक्ष्माविस्पष्टाबुद्धिवृत्तयः॥इतिवेदांतसिद्धांतपारगाःप्रवदंतिहि॥६६॥मांडूक्यताप
नीयादिश्रुतिष्वेतदतिस्फुटं॥आनंदमयभोक्तृत्वंब्रह्मानंदेचभोग्यता॥६७॥ ॥

वान्नानुभवस्त्वभिप्रा
येणाह॥अज्ञानेति॥इदंकुतोऽवगतमित्यत्रआह॥इतीति॥६६॥ननुआनंदमयोब्रह्मानंदंसूक्ष्माभिरवि
द्यावृत्तिभिर्भुंक्तइत्यत्रकिंमानमित्यतआह॥मांडूक्येति॥एतच्छ्रुत्यर्थमाह॥आनंदमयेति॥६७॥ ॥ ॥

६

इदानीं सुषुप्तस्थान एकीभूतः प्रज्ञानघन एवानंदमयो ह्यानंदभुक् चेतोमुख इति मांडूक्यादिश्रुतिगतं वाक्य
मर्थतः पठति। एकीभूत इति॥ सुषुप्तं सुषुप्तिः तत्र तिष्ठतीति सुषुप्तस्थः सुषुप्त्यभिमानीत्यर्थः॥ आनंदम
य आनंदप्रचुर आनंदभुक् स्वरूपभूतमानंदं भुंक्ते इत्यानंदभुक् चेतोमयवृत्तिभिः चेतश्चैतन्यं तन्मया

एकीभूतः सुषुप्तस्थः प्रज्ञानघनतां गतः॥ आनंदम
य आनंदभुक् चेतोमयवृत्तिभिः॥ ६८॥ ॥ ॥

स्ताभिश्चित्प्रतिबिंबसहिताभिरित्यर्थः॥ ताश्च ता वृत्तयश्च चेतोमयवृत्तयस्ताभिरानंदभुगिति योजना
॥ ६८॥ न वाक्यगतस्यैकीभूत इति पदस्यार्थमाह॥ विज्ञानेति। य आत्मा पुरा जागरणावस्थायां विज्ञानम
यमुख्यैः स वा अयमात्मा ब्रह्म विज्ञानमयो मनोमयः प्राणमयश्चक्षुर्मयः श्रोत्रमयः पृथिवीमय आपोम

योवायुमय आकाशमयस्तेजोमयोऽतेजोमयः काममयोऽकाममयः क्रोधमय इत्यादिश्रुत्युक्तैः रूपैराकारा
विशेषैर्युक्तोऽभूत्स एवाधुना लयेन विज्ञानमयाद्युपाधिविलयेनैकतामेकाकारतां प्राप्तो गतो भवति
। तत्र दृष्टांतमाह। बहुतंडुलेति। बहुतंडुलजनितपिष्टवदित्यर्थः॥ ६९॥ अथ प्रज्ञानघनशब्दार्थमाह प्र

विज्ञानमयमुख्यैर्यै रूपैर्युक्तः पुराधुना॥ स लयेनैकतां प्राप्तो बहुतंडुलपिष्टवत्॥ ६९॥
उत्तरदिशि प्रज्ञानानि पुरा बुद्धिवृत्तयोऽथ घनोऽभवत्॥ घनत्वं हिमबिंदूनामुदग्देशे यथा तथा॥ ७०॥

ज्ञानानीति। पुरा पूर्वं जाग्रदादौ प्रज्ञानशब्दवाच्यघटादिगोचराः या बुद्धिवृत्तयोऽभवन् ताः सुषुप्तिकाले
घटादिविषयाभावेन निघनोऽभवन् चिद्रूपेणैकरूपोऽभूत्॥ तत्र दृष्टांतमाह। घनत्वमिति॥ ७०॥ इदानीं
प्रज्ञानशब्दार्थनिरूपणप्रसंगादागतं किंचिदाह तद्घनत्वमितिपदद्वयं वेदांतेषु साक्षित्वेनाभिधीयमा

नघनानघनत्वमस्तिनदेवलौकिकाःशास्त्रसंस्काररहिताःतार्किकावैशेषिकादयःशास्त्रिणश्च दुःखाभावं
प्रचक्षतेदुःखाभावस्याऽऽकुःकुतइत्यतआह।यावदिति।यावत्सोदुःखवृत्तत्रयस्तासांसर्वासांविलयादि
त्यर्थः॥७१॥पूर्वोक्तार्थंतत्रश्रुतिवाक्यगतचेतोमुखशब्दार्थमाह॥अज्ञानेति।आनंदभोजनेसोऽश्नब्र

त्रि तद्घनत्वंसाक्षिभावंदुःखाभावंप्रचक्षते॥लौकिकास्तार्किकायावत्दुःखवृत्तिविलोपनात्॥
७१॥अज्ञानबिंबिताचित्स्यान्मुखमानंदभोजने॥भुक्तंब्रह्मसुखंत्यक्त्वाबहिर्यात्यथकर्मणा॥७२॥

स्यानंदास्वादनेसुखसाधनमज्ञानबिंबिताचित्स्यादज्ञानवृत्तौप्रतिबिंबितंचैतन्यमेवभवेत् ननुसुषुप्ता
वानंदमयरूपेणजीवेनब्रह्मसुखंचेद्भुज्यतेतर्हितस्यास्यकुतोजागरणंदुःखालयंगच्छेदित्यतआ
ह भुक्त्वेति।पुण्यापुण्यकर्मपाशबद्धत्वात्तेनप्रेरितोजीवःसाक्षात्कृतमपिब्रह्मानंदंपरित्यज्यायबहि

र्यातिजागरणादिकंगच्छतीत्यर्थः॥७२॥एतत्कुतोवगम्यतइत्याशंक्यपुनश्चजन्मांतरकर्मयोगात्सएवजी
वःस्वपितिप्रबुद्धइतिकैवल्यश्रुतिवाक्यादितिमत्वानत्तद्वाक्यमर्थतःपठंस्तदभिप्रायमाह।कर्मेति।७३
सुप्तोब्रह्मानंदोऽनुभूयतइत्यत्रलिंगंचाह॥किंचिदिति।प्रबुद्धस्यजागरणंप्राप्तस्यापिकिंचित्कालंस्वल्पं

कर्म्मजन्मांतरेऽभूद्यत्तद्योगाद्बुध्यतेपुनः॥इतिकैवल्यशाखायांकर्म्मजोबोधईरितः॥७३॥किं
चित्कालंप्रबुद्धस्यब्रह्मानंदस्यवासना॥अनुगच्छेद्यतस्तूष्णीमास्तेनिर्विषयःसुखी॥७४॥कर्म
भिःप्रेरितःपश्चान्नानादुःखानिभावयन्॥शनैर्विस्मरतिब्रह्मानंदमेषोऽखिलोजनः॥७५॥

कालपर्यंतंसुषुप्तावनुभूतस्यब्रह्मानंदस्यवासनासंस्कारोऽनुगच्छेदनुगच्छतिकुतएतदवगम्यतइत्यत
आह यतइति यतःकारणात्प्रबोधादौनिर्विषयः।विषयानुभवरहितोपिसुखीसन्तूष्णीमास्तेऽतोऽवग
म्यतइत्यर्थः॥७४॥तर्हिनित्यवत्तूष्णींकुतोनावतिष्ठतइत्यतआह कर्मभिरिति कर्मभिःपूर्वोक्तैःचोदितः

सर्वेपि प्राणीश्वा नानाविधानि दुःखान्यनुसंदधानः शनैर्ब्रह्मानंदं विस्मरति ॥७५॥ इतोपि ब्रह्मानंदेन विश्रुति
पत्रिः कार्यमाह ॥ प्रागिति ॥ यत्सहमनुष्याणां निशायाः प्रागर्धमपि निशारंभे निशावसाने च ब्रह्मानंदेन स्नेहो
स्तिय तो निशारंभे मृदुशय्यादि संपादयंति तदवसाने च तं परित्यक्तुमशक्तास्तल्पीमासते तेनेन कारणेनास्मि

प्रागर्धमपि निशायाः पश्यतो दिने दिने ॥ ब्रह्मानंदे नृणां तेन प्राज्ञोऽस्मिन्विवेचकः ॥७६॥
ननु तल्पीस्थितो ब्रह्मानंदस्थो ज्ञातिलौकिकाः ॥ अजसा श्चरितार्थाः स्युः शास्त्रेण गुरुणा च किं
७७

त्रानंदे को बुद्धिमान्विवदेत न कोपीत्यर्थः ॥७६॥ चोदयति ॥ नन्विति ॥ गुरुशुश्रूषादि लभ्यस्य ब्रह्मानंदानुभ
वस्य तल्पीस्थितिमात्रजन्यत्वे गुरुशुश्रूषादि पूर्वकं श्रवणादिकं वृथा स्यादित्यर्थः ॥७७॥ अथ ये ब्रह्मानंद
इति ज्ञाने सति भवत्येव कृतार्थता न देव गुरुशुश्रूषादिकमंतरेण न संभवतीत्याह ॥ ॥ ॥

वानमिति ॥ अत्यंतं गंभीरं दुरवगाहमवाङ्मनसगम्यं सर्वज्ञं सर्वांतरं सर्वात्मरूपं ब्रह्म गुरुशास्त्रे विहायान्ये
न केनाप्युपायेन को जानीयान्न कोपीत्यर्थः ॥७८॥ ननु न शास्त्रादेव ब्रह्मानंदं जानतोपि मे न कृतार्थतोपल
भ्यत इत्याशंकानुवादपूर्वकं सोपहासमुत्तरमाह ॥ जानामीति ॥७९॥ तमेव दृष्टांतं दर्शयति ॥ चतुर्वेदेति

वान्ब्रह्मेति विद्यश्चेत्कृतार्थास्तावृते व ते ॥ गुरुशास्त्रे विनात्यंतं गंभीरं ब्रह्म वेत्ति कः ॥७८॥ जा
नाम्यहं तदुक्त्यापि कुतो मे न कृतार्थता ॥ शृणु च त्वादृशे वृत्तं श्रुतं मन्यस्य कस्यचित् ॥७९॥ च
तुर्वेदविदे देयमिति श्रुत्वैव च वचनं ॥ वेदाश्चत्वार इत्येवं वेद्मि मे दीयतामिति ॥८०॥

कश्चित् चतुर्वेद
विदे कस्मैचित्स्वद्रव्यकुधनं दातव्यमित्येवंविधं वाक्यं श्रुत्वा वेदाश्चत्वार इत्येतस्मादेव वाक्यादहं वेद्मि अ
तो मे दीयतामिति वक्ति तद्वानपीत्यर्थः ॥८०॥

ननुवेदाश्चत्वारइतियोवेदसवेदानांसंख्यामेववेत्तिनतुवेदानांस्वरूपमितिचोदयति।संख्यामिति।मा
म्पेनसमाधत्ते।नहीति।एवंचतुर्वेदाभिज्ञमन्यस्यत्वमप्यशेषसंपूर्णपयाभवतितयाब्रह्मनवेत्सिनैवजा
नासि॥८२॥ननुसंख्यातिरिक्तवेदस्यस्वरूपभेदश्चस्वगतादिभेदशून्येआनंदरूपेब्रह्मणि।अज्ञायमान॰

संख्यामेवैषजानातिनतुवेदानशेषतः॥यदिनर्हित्वमप्येवंनाशेषंब्रह्मवेत्सिहि॥८२॥अखं
डैकरसानंदेमायातत्कार्यवर्जिते॥अशेषत्वसशेषत्ववार्तावसरएवकः॥८३॥शब्दानेवपठ
स्याहोतेषामर्थंचपश्यसि॥

सांशस्याभावादसंपूर्णज्ञानित्वोपालंभोनघटतइतिचोदयति।अखंडेति
॥८३॥ब्रह्मज्ञानेप्यशेषत्वादिकंदर्शयितुंब्रह्मजानामीतिवदंतंविकल्प्यपृच्छति।शब्दानिति।किमखंडैकरस
मद्वितीयंसच्चिदानंदरूपमित्यादिशब्दानेवपठसि।आहो।अथवातेषांशब्दानामर्थंस्वगतादिभेदशून्यता। २९

दिकंचपश्यसिजानासीतिविकल्प्यार्थः॥आद्येपक्षेसावशेषत्वंदर्शयति।शब्देति॥८३॥द्वितीयेपितद्दर्शय
ति।अर्थइति।व्याकरणंघुपलक्षणंनिगमादेःव्याकरणादिनापरोक्षज्ञानेसंपादितेपिसंज्ञायादिनिरा
सेनापरोक्षीकरणमवशिष्यतेनहिकिंतदासंपूर्णत्वंज्ञानस्येत्याशंक्यतदवधिंदर्शयति।स्यादिति।पदार्थत

शब्दपाठेऽर्थबोधस्तेसंपाद्यत्वेनशिष्यते॥८३॥अर्थेव्याकरणाद्बुद्धेसाक्षात्कारोवशिष्यते॥स्यात्कृ
पत्र तार्थत्वधीर्यावद्यावद्गुरुमुपास्स्वभो॥८४॥आस्तामेतद्यत्रयत्रसुखंस्याद्विषयैर्विना॥तत्रसर्वत्रविद्ध्येतां
ब्रह्मानंदस्यवासनां॥८५॥

यत्कृतार्थत्वबुद्धिरुत्पद्यतेतदाज्ञानस्यसंपूर्णताऽवगंतव्येत्यर्थः॥८४॥एवंप्रासंगि
कंपरिसमाप्यप्रकृतमेवानुसरति।आस्तामितियत्रयत्रयस्मिन्यस्मिन्कालेतूष्णींभावादौविषयानुभव
मंतरेणसुखंभवतितत्रतत्रसुखस्यविषयजन्यत्वाभावात्सामान्याहंकाराहतत्वाच्चवासनानंदत्वमवगं
तव्यमित्यर्थः॥८५॥

एवंब्रह्मानंदवासनानंदौदर्शयित्वाइदानीमानंदत्रैविध्यनियमनाय आत्माभिमुखधीवृत्तावित्यत्रोक्तमेव
विषयानंदं पुनरनुवदति विषयेष्विति॥ यदायदास्रगादिविषयलाभात्तदिछोपरमोभवतितदातदाम
नस्यंतर्मुखसतितस्मिन्मनःस्वात्मानंदः प्रतिबिंबितोभवत्ययंविषयानंदइत्यर्थः॥८६॥ फलितमाह॥ ब्रह्मा

विषयेष्वपिलब्धेषु तदिछोपरमेसति॥ अंतर्मुखमनोवृत्तावानंदः प्रतिबिंबति॥८६॥ ब्रह्मा
नंदोवासनाचप्रतिबिंबइतित्रयं॥ अंतरेणजगत्यस्मिन्नानंदोनास्तिकश्चन॥८७॥ ॥ ॥

नंदइति उक्तप्रकारेणस्वप्रकाशतयासुषुप्तौप्रतिभासमानोयोब्रह्मानंदोयश्चतत्संस्थितौविष
यानुभवमंतरेणप्रतीयमानोवासनानंदोयोप्यभीष्टविषयलाभादंतर्मुखेमनसिप्रतिबिंबितो
विषयानंदएतत्त्रितयातिरेकेणास्मिन्जगतिनकश्चिदानंदोस्ति॥ ॥ २७

ननु आनंदस्त्रिविधोब्रह्मानंदोविद्यासुखंतथाविषयानंदइत्येकेनप्रकारेणानंदत्रैविध्यमुक्तमिदानीं
तुब्रह्मानंदोवासनाचप्रतिबिंबइतित्रयमितितद्विलक्षणमानंदस्यत्रैविध्यमुच्यतेऽतःपूर्वोत्तरविरो
धःकिंचयावद्यावदहंकारोविस्मर्यतेऽभ्यासयोगतःतावत्तावत्सूक्ष्मदृष्टेर्निजानंदोऽनुमीयतइतिनाहरू
पुमानुदासीनकालेप्यानंदवासनोउपेक्ष्यसुखमानंदंभावयत्येवतत्परइतिचोक्तोप्रकारद्वयातिरि
क्तोनिजानंदसुखानंदावभिधीयेतेतथाद्वितीयाध्यायेमंदप्रज्ञंतुजिज्ञासुमात्मानंदेनबोधयेदित्या
त्मानंदस्ततोऽन्योऽभिधीयतेयोगानंदःपुरोक्तोयइत्यत्रयोगानंदोपिकश्चिदवभासतेब्रह्मानंदाभिधे
ग्रंथेतृतीयाध्यायइतिःअद्वैतानंदएवस्यादित्यत्राद्वैतानंदंचास्मनवगच्छामःअतोऽतरेणजग
त्यस्मिन्नानंदोनास्तिकश्चनेत्युक्तिर्विरुध्यतेतिचेन्मैवंविद्यानंदस्यविषयानंदवदंतःकरणवृत्तिवि
शेषत्वेनविषयानंदेऽंतर्भावस्यविषयानंदवद्विद्यानंदोधीवृत्तिरूपकइत्युत्तरत्रधीवृत्तिरूपत्वाऽभि
धानेनविवक्षितत्वान्निजानंदसुखानंदात्मानंदयोगानंदाद्वैतानंदानांतुब्रह्मानंदादनतिरिक्त

त्वाच्च तथा हि यावद्यावदहंकार इत्युदाहृते श्लोके योगलक्षणोपायगम्यतया योगानंदत्वेन विवक्षितस्य नि
जानंदस्यैव न द्वैतभासस्तेनापि निद्रानवाप्तिः यत्सुखं स ब्रह्मानंद इत्याह भगवानर्जुनं प्रति तस्मिन्नुत्तर
श्लोक एव ब्रह्मानंदत्वाभिधानान्निजानंदो ब्रह्मानंदान्न भिद्यते तथा मुख्यानंदोऽपि ब्रह्मानंद एव तथा च
विषयानंदो वासनानंद इत्यमू आनंदौ जनयन्नास्ते ब्रह्मानंदः स्वयंप्रभ इत्यत्र जन्यत्वेनामुख्यत्वमुक्तं तयो
र्विषयानंदवासनानंदयोर्जनकत्वेनाभिहितस्य ब्रह्मानंदस्यैव तादृक्सुखमात्रं तूदासीनकालेऽपीत्युदा
हृत एव श्लोके आनंदवासनामुपेक्ष्य मुख्यमानंदं भावयन्नेव तत्पर इति मुख्यानंदत्वाभिधानादात्मानं
दाद्वैतानंदयोस्तु ब्रह्मानंदत्वं योगानंदः पुरोक्तो यः स आत्मानंद इष्यताम् इति तन्नीध्यायायाद्वैतप्रय
माध्याययोर्योगानंदतया विवक्षितस्य ब्रह्मानंदस्यैव योगानंदत्वाद्वैतानुवादपूर्वकमात्मानंदताभि
धायकत्वेन प्रतत्वमेतस्य सद्वयस्येति चेदिति प्रश्नपूर्वकमाकाशादिशरीरांतमित्यादिनाऽद्वितीय
स्य ब्रह्मत्वप्रतिपादनादवगंतव्यं तस्माद्ब्रह्मानंदो वासनाप्रतिबिंब इत्युक्तत्रैविध्यं सुस्पष्टमनुन २८

दिन न्वेवं वासनानंदाद्ब्रह्मानंदादपीतरं वेत्तु योगी निजानंदमित्यत्र निजानंदस्य ब्रह्मानंदवासनानंदा
भ्यां भेदेन निर्देशो न युज्यत इति न शंकनीयं एकस्यैव ब्रह्मानंदस्य जगत्कारणत्वोपाधिसाहित्यराहित्य
भेदेन भेदव्यपदेशोपपत्तेः तथा हि ब्रह्मानंदनिरूपणावसरे आनंदादेव भूतानि जायंत इत्यादिना जग
त्कारणत्वाभिधानेन ब्रह्मानंदस्य समायत्वमवगम्यते निर्मायस्य जगत्कारणत्वानुपपत्तेः निजानंदनि

तथा च विषयानंदो वासनानंद इत्यमू ॥ आनंदौ जनयन्नास्ते ब्रह्मानंदः स्वयंप्रभः ॥८८॥

रूपणकालेऽपि यावद्यावदहंकार इत्यादिना सकारणस्याहंकारस्य विलयप्रतिपादनान्निजानंदस्य नि
र्मायत्वमिति सर्वमनवद्यं ॥८८॥ नन्वस्मिन्नध्याये ब्रह्मानंदविवेचनस्यैव प्रस्तुतत्वादितरानंदद्वय
प्रतिपादने प्रसक्तासंगतमित्याशंक्य तयोर्ब्रह्मानंदजन्यत्वेन तद्बोधोपयोगित्वान्न प्रसक्तासंगतमित्य

भिप्रायेणाह। तथा चेति। तथा च एवमानंदत्रैविध्ये सति यः स्वयंप्रकाश आनंदो विषयानंदवासनानंदौ
जनयति स ब्रह्मानंदो वेदितव्य इत्यर्थः॥८७॥ इत्थानुकीर्तनपूर्वकमुक्तमर्थं यमवतारयति श्रुतीति॥
श्रुतिभिः सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेतीत्यादिभिरुदाहृताभिः युक्तिभिः सुखम

श्रुतियुक्त्यनुभूतिभ्यः स्वप्रकाशचिदात्मके॥ ब्रह्मानंदे सुप्तिकाले सिद्धे सत्यन्यदाशृणु॥८८॥

हमस्वाप्समित्यादिपरामर्शान्यथानुपपत्त्यादिभिरनुभूत्या चार्थापत्तिकल्पितेन सौषुप्तानुभवेन च सु
षुप्तिकाले स्वप्रकाशो ब्रह्मानंदः साधित इतः परमन्यज्जागरणावस्थायामपि यो ब्रह्मानंदावगमो
पायो वक्ष्यते तं शृणु इत्यर्थः॥८८॥ प्रतिज्ञातमेव ब्रह्मानंदावगमोपायं दर्शयितुं तदुपोद्घातत्वेन २९

सनिमित्तां जीवस्यावस्थात्रयप्राप्तिं दर्शयति। य इति। सुप्तौ सुषुप्तिकाले विलीनावस्थ आनंदमयशब्देन
कथ्यत इत्युक्तो य आनंदमयः स विज्ञानशब्दाभिधेयबुद्ध्युपाधिमत्वेन विज्ञानमयतां प्राप्य स्थान
भेदतः वक्ष्यमाणस्थानविशेषयोगेन स्वप्नं जागरणं वा कर्मानुसारेणागच्छति॥९०॥ इदानीं जाग्रद

य आनंदमयः सुप्तौ स विज्ञानमयात्मतां॥ गत्वा स्वप्नं प्रबोधं वा प्राप्नोति स्थानभेदतः॥९०॥
नेत्रे जागरणं कंठे स्वप्नः सुप्तिर्हृदंबुजे॥ आपादमस्तकं देहं व्याप्य जागर्ति चेतनः॥९१॥ ॥

द्यवस्थोपयोगीनि स्थानानि दर्शयति। नेत्र इति। नेत्रशब्दस्य सकलत्वग्देहोपलक्षणपरत्वमभिप्रेत्य नेत्रे जा
गरणमित्येतस्यार्थमाह॥ आपादेति॥९१॥ चेतनो जीवः देहं व्याप्येत्यनेन विवक्षितमर्थं दृष्टांतप्रद
र्शनेन स्पष्टयति। देहेति। तत्र प्रमाणमाह। तत इति। यतो मनुष्यत्वादिजातिमता देहेन तादात्म्यं प्रा

मस्ततोऽहं मनुष्य इत्येवं निश्चित्य संशयादिरहितज्ञानेन गृहीत्वैवावतिष्ठते ॥१०२॥ देहतादात्म्याभिमा-
नहेतुकान्येवावस्थांतराणि दर्शयति। उदासीन इति। तत्र सुखित्वदुःखित्वयोः कर्मजन्यत्वज्ञानाय वि-
शेषणम्। तयोः सुखदुःखयोः कर्मैकहेतुत्वं दर्शयति। सुखदुःखे इति ॥१०३॥ तयोश्च सुखदुःखयोर्द्वै-

देहतादात्म्यमापन्नस्तप्तायःपिंडवत्ततः ॥ अहं मनुष्य इत्येवं निश्चित्यैवावतिष्ठते ॥१०२॥ उदासीनः
सुखी दुःखीत्यवस्थात्रयमेत्यसौ ॥ सुखदुःखे कर्मकार्ये त्वौदासीन्यं स्वभावतः ॥१०३॥ बाह्यभोगान्म-
नोराज्यात्सुखदुःखे द्विधा मते ॥ सुखदुःखांतरालेषु भवेत्तूष्णीमवस्थितिः ॥१०४॥ न कापि चिंता मेऽ-
स्त्यद्य सुखमास इति ब्रुवन् ॥ औदासीन्ये निजानंदभानं वक्त्यखिलो जनः ॥१०५॥

मित्रभेदाद्वैविध्यमा-
ह ॥ बाह्येति तयोरौदासीन्यं कदाचित्स्यादित्यत आह। सुखेति ॥१०४॥ वक्तिभेदविवक्षया प्रोक्तवचनं यदर्थमा- १०
श्रितं तदुपन्यस्तं तदिदानीं दर्शयति न कापीति। सर्वोऽपि जन इदानीं मम कापि चिंता गृहादिविषया नास्त्यतः

सुखं यथा भवति तथाऽतिष्ठामीति वदन्नौदासीन्यकाले स्वरूपानंदस्फूर्तिश्रितेऽतो जागरणावस्थायामपि नि-
जानंदभानमस्तीत्यवगंतव्यमित्यभिप्रायः ॥१०५॥ ननु औदासीन्येऽवभासमानस्य निजानंदत्वेनास्य ब्र-
ह्मानंदत्वात्सर्वेषां वासनानंदत्वानुपपत्तिरित्याशंक्याहंकारसामान्यावृतत्वान्न ब्रह्मानंदतेति परिह-

अहमस्मीत्यहंकारसामान्याच्छादितत्वतः ॥ निजानंदो न मुख्योऽयं किंत्वसौ तस्य वासना ॥१०६॥
नीरपूरितभांडस्य बाह्ये शैत्यं न तज्जलं ॥ किंतु नीरगुणस्तेन नीरसत्तानुमीयते ॥१०७॥

रति। अहमिति। देवदत्तोऽहमित्यादिविशेषशून्येनास्मीत्येवंरूपेणाहंकारसामान्येनावृतत्वान्नायं मुख्य इ-
त्यर्थः। तर्हि तस्य किंरूपत्वमित्यत आह किंत्विति ॥१०६॥ सुखानंदातिरिक्तवासनानंदसद्भावे दृष्टांतमाह ॥
नीरेति। जलपूर्णकुंभस्य बहिर्भागे स्पर्शनेनोपलभ्यमानं यच्छैत्यमस्ति तन्नावजलेन भवति इवतानुपले

भातृकिंतर्हिनिर्दिश्यतइत्यतआहकिंत्विति। निर्गुणत्वंकथमवगम्यतइत्यतआह। नेनेतिविमतंघटवदुपलभ्यमा
नंशैत्यंजलजन्यंभवितुमर्हतिशैत्यत्वाज्जलेउपलभ्यमानशैत्यवदिति॥९७॥ भवत्वेवंनीरागुमापकत्वं
शैत्यस्यप्रकृतेकिमायातमित्याशंक्यतद्वद्वासनानंदस्यापिसुखानंदानुमापकत्वमायातमित्याह। व्या
वदिति। अभ्यासयोगतः ज्ञानमात्मनिमहतिनियच्छेत्तद्यच्छेच्छांतआत्मनीतिश्रुत्यभिहितनिरोधस्य

यावद्यावदहंकारोविस्मृतोभ्यासयोगतः॥ तावत्तावत्सूक्ष्मदृष्टेर्निजानंदोनुमीयते॥९८॥

माध्यभ्यासयोगेनयावद्यावदहमादिवृत्तिविलयवशाच्चित्तस्यसूक्ष्मताजायतेतावत्तावन्निजानंदाभिव्य
क्तिर्भवतीत्यनुमीयते। अयमत्रप्रयोगः अहंकारसंकोचविशेषविशिष्टक्षणेषुद्वितीयादिक्षणाःप
थमःसपूर्वस्मात्क्षणादधिकनिजानंदाविर्भाववानहंकारसंकोचविशेषयुक्तकालत्वादहंकारसंकोचयु ३१

काद्यक्षणवदिति॥९८॥ बुद्धिसौक्ष्म्यस्यकोवधिरित्याकांक्षायांसाक्षात्कारोवधिरित्याह। सर्वेति। तर्हि
सानिद्रैवस्यादित्यतआह। अलीनत्वादिति। सर्वहृत्तिविलयेप्यंतःकरणरूपविलयाभावान्नेयंनि
द्राबुद्धेःकारणात्मनावस्थानंसुषुप्तिरित्याचार्यैरुक्तत्वादित्यर्थः। अंतःकरणस्वरूपविलयाभा

सर्वात्मनाविस्मृतःसन्सूक्ष्मतांपरमांव्रजेत्॥ अलीनत्वान्ननिद्रैषाततोदेहोपिनोपतेत्॥
९९॥ नद्वैतंभासतेनापिनिद्रातत्रास्तियत्सुखं॥ सब्रह्मानंदइत्याहभगवानर्जुनंप्रति॥१००॥

वेलिंगमाह। ततइति। यत्रसुस्याद्यावदहंकारविलयस्तत्रदेहपातोदृष्टइतुतद्भावादविलीनस्
तिशून्यतेफलितमाह॥९९॥ नद्वैतमिति। यस्मिन्कालेद्वैतभानंनास्तिनिद्रापिनागच्छति। तस्मि
न्कालेउपलभ्यमानंयत्सुखमस्तिसब्रह्मानंदइत्यर्थः॥ ॥

अयंब्रह्मानंदइतिकुतोऽवगम्यतइत्याशंक्यतल्लक्षणवाक्यादित्याह ॥ इत्यादेति । गीतायांषष्ठाध्यायइतिशे
षः ॥१००॥ तच्चकैःश्लोकैरुक्तवानित्याशंक्यतांश्लोकान्पठत्यर्थक्रमानुसारेणशनैरिति । अयमर्थः
धृतिगृहीतयाधैर्ययुक्तयाबुद्ध्यासाधनभूतयाशनैःशनैःनसहसाउपरमेत्मनसउपरतिंकुर्यात्

शनैःशनैरुपरमेद्बुद्ध्याधृतिगृहीतया ॥ आत्मसंस्थं
मनःकृत्वानकिंचिदपिचिंतयेत् ॥१०१॥ ॥

कियत्पर्यंतमित्यतआह । आत्मेति मनश्चात्मसंस्थमात्मनिसंस्थासम्यक्स्थितिः आत्मैवेदंसर्वंनत
तोऽन्यत्किंचिदस्तीत्येवंरूपायस्यतदात्मसंस्थंतथाविधंकृत्वानकिंचिदपिचिंतयेदेषयोगस्यपरमो
ऽवधिः ॥१०१॥ एतत्संपादनेप्रवृत्तोयोगीप्रथमंकिंकुर्यादित्यत्राह । यतइति । चंचलंस्वभावदोषात्अ

तएवास्थिरमेकत्रविषयेऽनियतमेवंविधंमनोयद्दायतोयतोयस्माद्यस्माच्छब्दादेर्निमित्तान्निश्चरति
निर्गच्छतिततस्ततस्तस्मात्तस्माच्छब्दादेःसकाशान्नियम्यतेषांशब्दादीनांमिथ्यात्वादिदोषदर्शनेना
भ्यासीकृत्यवैराग्यभावनापूर्वकंनिरुध्यएतन्मनआत्मन्येववशंनयेत्आत्मवश्यमापादयेत्एवंयो

यतोयतोनिश्चरतिमनश्चंचलमस्थिरं ॥ ततस्ततोनियम्यैतदात्मन्येववशंनयेत् ॥१०२॥
प्रशांतमनसंह्येनंयोगिनंसुखमुत्तमं ॥ उपैतिशांतरजसंब्रह्मभूतमकल्मषं ॥१०३॥ ॥

गमभ्यसतोऽभ्यासवशादात्मन्येवमनःप्रशाम्यति ॥१०२॥ मनःप्रशांतौकिंभवतीत्यतआह प्रशांतेति
शांतरजसंप्रक्षीणमोहादिक्लेशरजसंअतएवप्रशांतमनसंप्रकर्षेणात्यर्थंशांतंविक्षेपशून्यंमनोय
स्यतंब्रह्मभूतंब्रह्मैवेदंसर्वमितिनिश्चयवत्तयाजीवन्मुक्तमकल्मषंअधर्मादिवर्जितंएनंयोगिनमुत्त

ज्ञानंद॰ ३३ मंज्ञायिसुखमातिशयत्वाद्विशेषरहितंसुखमुपगच्छतिउपैति॥२०३॥संगृहीतार्थंप्रपंचपरोक्षाहीयोनेवस्तो
कान्पवति।यत्रेत्यादि त्रीन्‌चित्तंयत्रयस्मिन्कालेयोगसेवयायोगानुष्ठानेनसर्वस्माद्विषयान्निवारितंसदु
परमतेउपरतिंगच्छतिकिंचयत्रयस्मिन्नेवकालेआत्मनासमाधिपरिशुद्धेनांतःकरणेनआत्मानंपरंचै

यत्रोपरमतेचित्तंनिरुद्धंयोगसेवया॥यत्रचैवात्मनात्मानंपश्यन्नात्मनितुष्यति॥२०४॥
सुखमात्यंतिकंयत्तद्बुद्धिग्राह्यमतींद्रियं॥वेत्तियत्रनचैवायंस्थितश्चलतितत्त्वतः॥२०५॥

तस्यंज्योतिःस्वरूपेपश्यन्नुपलभमानःस्वस्मिन्नेवतुष्यतिनतुहिंजनतेनविषयेष्वित्यर्थः॥२०४॥किंचय
त्रयस्मिन्कालेआत्मनिस्थितोयोगीआत्यंतिकमत्यंतमेवभवतीतात्यंतिकमनंतंबुद्धिग्राह्यमिंद्रिय
निरपेक्षयाबुद्ध्याग्राह्यमारणमतींद्रियमिंद्रियगोचरातीतम्‌विषयजनितेयत्रहीदृशंसुखंवेत्त्यनुभवति ३३

किंचआत्मनिस्थितोयंततस्तस्मादात्मस्वरूपान्नचलतिनप्रच्यवते॥२०५॥किंचयमात्मलाभंलब्ध्वाप्रा
प्यापरंलाभंलाभांतरंततोधिकंनमन्यतेआत्मलाभात्परंविद्यतइतिस्मृतेः।किंचयस्मिन्नात्मतत्त्वेस्थितोगु
रुणामहतापिदुःखेनशस्त्रविघातादिलक्षणेनप्रज्ञाद्दवनविचाल्यते॥२०६॥इदानीमुपपादितंयोगं
निगमयतितंविद्यादिति।शनैःशनैरित्यादिनायावद्भिर्विशेषणैर्विशिष्टआत्मावस्थाविशेषोयोगत्वेक
यंलब्ध्वाचापरंलाभंमन्यतेनाधिकंततः॥यस्मिन्स्थितोनदुःखेनगुरुणापिविचाल्यते॥२०६॥ ॥
तंविद्याद्दुःखसंयोगवियोगंयोगसंज्ञितं॥सनिश्चयेनयोक्तव्योयोगोऽनिर्विण्णचेतसा॥२०७॥

तंदुःखसंयोगवियोगंदुःखैःसंयोगेदुःखसंयोगस्तेनवियोगस्तंविपरीतलक्षणयायोगसंज्ञितंयोगइ
सेवसंज्ञितंविद्याज्जानीयात्॥एवंविधयोगानुष्ठानेकिंचित्कर्तव्यताविशेषमाह।सइतिसपूर्वोक्तोयो
गोनिश्चयेनाध्यवसायेनअनिर्विण्णचेतसानिर्वेदरहितेनचित्तेनयोक्तव्योऽनुष्ठेयः॥२०७॥

इदानीमुक्तमर्थमुपसंहरति युंजन्निति॥ विगतकल्मषो विगतपापो योगांतरायवर्जितो योगी सदात्मान
मेवं यथोक्तेन प्रकारेण युंजन्ननुसंदधानः सुखेनानायासेन ब्रह्मसंस्पर्शं ब्रह्मणा संस्पर्शो यस्य सुखस्य
तद्ब्रह्मसंस्पर्शं ब्रह्मस्वरूपभूतमिति यावदत्यंतमविनश्वरं निरतिशयं सुखमश्नुते प्राप्नोतीत्यर्थः॥ २८॥

युंजन्नेवं सदात्मानं योगी विगतकल्मषः॥ सुखेन ब्रह्मसंस्पर्शमत्यंतं सुखमश्नुते॥ २८॥
उत्सेक उदधेर्यद्वत्कुशाग्रेणैकबिंदुना॥ मनसो निग्रहस्तद्वद्भवेदपरिखेदतः॥ २९॥ ॥

अनिर्वेदेन क्रियमाणो योगाभ्यासः फलपर्यंतो भवतीत्येतत्सदृष्टांतमाह॥ उत्सेक इति॥ कुशाग्रेण
उद्धृतेनैकेन बिंदुना क्रियमाण उदधेरुत्सेक उद्धृत्य बहिः सेचनं परिखेदाभावे सति यथा कालांतरे
भवेदेव तद्वन्मनसो निग्रहोऽपि श्रमराहित्येन क्रियमाणः कालांतरे सिद्ध्येत्॥ इदं च टिट्टिभोपाख्यानेम ३४

नमभिनिधायोक्तं॥ २९॥ न केवलमयमर्थो गीतायामभिहितः किंतु मैत्रायणीयशाखायामपीत्याह॥
बृहद्रथ इति॥ मैत्रायणीयनामकयजुःशाखामध्ये शाकायन्यनामकः कश्चिदृषिः स्वशिष्यत्वेनोपसन्नस्य
बृहद्रथाख्यस्य राजर्षेर्ब्रह्मसुखे समाध्यभिधानपूर्वकं यथा भवति तथोक्तवान्॥ ३०॥ केन प्रकारेणो

बृहद्रथस्य राजर्षेः शाकायन्यो मुनिः सुखं॥ आह मैत्राख्यशाखायां समाध्युक्तिपुरःसरं॥ ३०॥
यथा निरिंधनो वह्निः स्वयोनावुपशाम्यति॥ तथा वृत्तिक्षयाच्चित्तं स्वयोनावुपशाम्यति॥ ३१॥

क्तवानित्याशंक्य तत्प्रतिपादकौ तदीयौ मंत्रावाह इति यथेति निरिंधनो दग्धकाष्ठो वह्निः स्वयोनौ स्व
कारणे तेजोमात्रे उपशाम्यति ज्वालादिरूपं विशेषाकारं परित्यज्य तेजोमात्ररूपेण यथावतिष्ठते त
थानेनैव प्रकारेण चित्तमंतःकरणमपि वृत्तिक्षयान्निरोधसमाध्यभ्यासेन राजसादिसकलवृत्तिनाशा

त्वकारेण सत्वमात्रेणुपसाम्यति सत्वमात्रोवशिष्टं भवतीत्यर्थः ॥२२०॥ ननु ततः किं स्यात्तत्राह। त्वयोनाविति
।सत्येत्रात्मनि विषये कामो यस्यास्तीति सत्यकामिनस्यान एव यो नाशु उपशांतस्य तु पशांतत्वादेव इंद्रिया-
र्थविभ्रमस्येंद्रियार्थेषु शब्दादिषु विभ्रमस्य विसुखस्य ज्ञानशून्यस्य मनसः कर्मवशाननुगच्छंतीति कर्म-
वशानुगाः ससाधना सुखदुःखादयो ऽनन्ता मायिकत्वसाने ननु मिथ्याभूताः स्फुरिंत्यर्थः ॥२२१॥ ननु चित्तोप

त्वयोनाशु उपशांतस्य मनसः सत्यकामिनः ॥ इंद्रियार्थविभ्रमस्याऽनन्ताः कर्मवशानुगाः ॥२२१॥
चित्तमेव हि संसारस्तत्प्रयत्नेन शोधयेत् ॥

शांतौ जगन्मिथ्या भवतीत्येतदनुपपन्नं तदुपादानकत्वाभा-
वात्तस्येत्याशंक्याह। चित्तमिति। यद्यपि स्वरूपेण चित्तोपादानकं जगन्न भवति तथापि तस्य भोग्यत्वे चि-
त्तकारणकमेव हि शास्त्रेनात्रे सर्वानुभवे च माणयति सुषुप्त्यादौ चित्तविलये भोगादर्शनादिति भा ३५

वः यत्तच्चित्तात्मकः संसारो तच्चित्तमेव प्रयत्नेनाभ्यासवैराग्यादिलक्षणेन शोधयेत् रजस्तमोराहित्ये
न एकाग्रं कुर्यात् ॥ नन्वात्मनो विमुक्तये आत्मैव शोधनीयो न चित्तमित्याशंक्याह। यच्चित्त इति। मर्त्यस्तु
पलक्षणं देहिमात्रस्य यो देही यच्चित्तोपस्थितस्तु चादौ विषये चित्तवान्भवति स तन्मयस्तदात्मक एव त-
स्मात्कस्यचैकस्य योरात्मन्येव समारोपण देतत्सनातनमिदमनादिसिद्धं गुह्यं रहस्यं तदुक्तं भवतिस्व

यच्चित्तस्तन्मयो मर्त्यो गुह्यमेतत्सनातनं ॥२२॥ चित्तस्य हि प्रसादेन हंति कर्म शुभाशुभं ॥

भावतः शुद्धस्यात्मनो यत्तच्चित्तसंपर्कादेव संसारित्वं ध्यायतीव लेलायतीवेति श्रुतेः अतश्चित्तस्य शोध
नेनात्मनः संसारनिवृत्तिरिति ॥२२३॥ नन्वनादिभवपरंपरोपार्जितसुखदुःखप्रदपुण्यपापकर्मणां
सत्वे चित्तशोधनेनापि कथमात्मनः संसारनिवृत्तिर्भविष्यतीत्याशंक्याह चित्तप्रसादे पजल्पित ब्रह्मा

नुसंधानेन सकलकर्मक्षयोपपन्नेमैंवे मितिपरिहरति चित्तस्यहीति हिशब्देन तद्ध्येयी कालत्रमश्रौशे तं प्रद्द्येतैवँहास्य सर्वेपाप्मानः प्रद्द्यंते उपपातकेषु सर्वेषु पातकेषु महत्सु च प्रविश्य रजनीपादं ब्र ह्मध्यानं समाचरेदित्यादिस्मृतिस्मृतिप्रसिद्धिं द्योतयति॥ ततः किमित्यत आह प्रसन्नेति। प्रसन्नश्चा त्मा चेतोयस्य स तथोक्तः आत्मनि स्वरूपभूते ऽद्वितीयानंदलक्षणे ब्रह्मणि स्थित्वा तदेवाहमिति।

प्रसन्नात्मात्मनि स्थित्वा सुखमक्षय्यमश्नुते॥२३॥ समासक्तं यथा चित्तं जंतोर्विषयगोचरे॥

निश्चयेन तद्रूपतां परिहृत्य चिन्मात्ररूपेणावस्थाय अक्षय्यमविनाशि यत्सुखं स्वरूपभूतं तदश्नु ते॥२३॥ प्रसन्नात्मात्मनि स्थित्वेत्युक्तमेवार्थं दृष्टांतोक्तिपुरःसरं द्रढयति समासक्तमिति। प्राणिनश्चि त्तं विषय एव गोचरो विषयगोचरः इंद्रियप्रचारभूमिः तस्मिन्यथा स्वभावतः सम्यगासक्तं भवति॥ ३६

तद्देव चित्तं ब्रह्मणि प्रत्यगभिन्ने परमात्मनि यद्येवमासक्तं स्यात् तर्हि कः संसारान्न मुच्येत सर्वोपि मुच्यत एवेत्यर्थः॥२४॥ उक्तार्थद्वार्ढ्याय मनसोऽवांतरभेदमाह। मनो हीति तत्र कारणमाह। अ शुद्धमिति। कामः इत्युपलक्षणं क्रोधादेरपि॥२५॥ द्विविधस्यैव तस्य क्रमेण संसारमोक्षयोर्हेतु

यद्येवं ब्रह्मणि स्यात्तत्को न मुच्येत बंधनात्॥२४॥ मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च॥
अशुद्धं कामसंपर्काच्छुद्धं कामविवर्जितं॥२५॥ मन एव मनुष्याणां कारणं बंधमोक्षयोः॥
बंधाय विषयासक्तं मुक्तं निर्विषयं स्मृतं॥२६॥ समाधिनिर्धूतमलस्य चेतसो निवेशितस्या त्मनि यत्सुखं भवेत्॥

तां दर्शयति॥ मन इति॥२६॥ प्रसन्नात्मात्मनि स्थित्वा सुखमक्षय्यमश्नुत इत्युक्तमेवार्थं श्रुतिः स्वयमेव प्रपंचयति। समाधीति॥ आत्मनि प्रत्यक्स्वरूपे निवेशितस्य समाधिनिर्धूतमलस्य समाधिना प्रत्य

ग्ब्रह्मणोरैक्यगोचरवृत्त्या ध्यानिर्द्धूतमलस्य निःशेषेण निवारितरजस्तमोमलस्य चेतसस्तस्मि-
न्समाधौ यत्सुखमुपलभ्यते तदा समाधावुपलब्धं तत्सुखं गिरा वाचा वर्णयितुं न शक्यते अलौकिकसु-
खत्वादित्यर्थः॥ किंतु स्वयं तत्स्वरूपभूतं सुखमंतःकरणेनैव गृह्यते॥१७॥ नन्वस्यैव समाधेर्दुर्लभत्वा

न शक्यते वर्णयितुं गिरा तदा स्वयं तदंतःकरणेन गृह्यते॥१७॥ यद्यप्यसौ चिरं काले समा-
धिर्दुर्लभो नृणां॥ तथापि क्षणिको ब्रह्मानंदं निश्चाययत्यसौ॥१८॥ श्रद्धालुर्व्यसनी योऽत्र निश्चि-
नोत्येव सर्वथा॥

कथमनेन ब्रह्मानंदनिश्चयसंभव इत्याशंक्याह यद्यपीति। अस्य समाधेः सत-
तस्यासंभवेऽपि क्षणिकस्य तस्य संभवात्तेनैवायमानंदो निश्चेतुं शक्यत इत्यर्थः॥१८॥ नन्वात्मदर्श-
नाय श्रवणादौ प्रवृत्ता अपि केचिदानंदनिश्चयमप्राप्य बहिर्मुखा एव वर्तंत इत्याशंक्याह श्रद्धालुरिति॥ ३७

रहिता नो तथात्वेऽपि श्रद्धादिमतो तन्निश्चयो भवत्येवेत्याह श्रद्धालुरिति। व्यसनेन सर्वथा संपादयिष्यामी-
त्याग्रहः तद्वान् व्यसनी अत्र समाधौ सर्वथा अवश्यं ततः किमित्यत आह॥ निश्चिते त्विति। तस्मिन्ब्रह्मा-
नंदे सकृदेकदा क्षणिकसमाधौ निश्चिते सति अयं सकृन्निश्चयवान् अन्यदापि इतरस्मिन्कालेऽपि वि-

निश्चिते तु सकृत्तस्मिन्विश्वसित्यन्यदाप्ययं॥१९॥ तादृक्पुमानुदासीनकालेऽप्यानंदवासनां॥ उपेक्ष्य
मुख्यमानंदं भावयत्येव तत्परः॥२०॥ परव्यसनिनी नारी व्यग्रापि गृहकर्मणि॥ तदेवास्वादयत्यंतः
परसंगरसायनं॥२१॥

श्वसिति आनंदोऽस्तीति विश्वासं करोति॥१९॥ ततोऽपि किं तत्राह तादृगिति।
तादृक्पुमान् सकृच्छ्रद्धादिपुरःसरं सकृन्निश्चयवान् पुरुषः उदासीनदशायामपि उपलभ्यमानां पूर्वोक्ता-
मानंदवासनामुपेक्ष्य तत्परः मुख्यानंदे तात्पर्यवान् तमानंदमेव भावयति॥२०॥ एवं व्यवहारकालेऽपि नि-

ब्रह्मानंद॰ ३८

ज्ञानंदंभावयतीत्यत्रदृष्टांतमाहपरेति॥२२१॥हृष्टीतिकेयोजयतिएवमिति॥२२२॥धीरत्वाद्यर्थमाह॥धी
रत्वमिति।इंद्रियाणांविषयाभिमुख्येनपुरुषाकर्षणसामर्थ्येपिस्वरूपसुखानुसंधानेच्छयासर्वाणींद्रि

एवंतत्वेपरेशुद्धेधीरोविश्रांतिमागतः॥तदेवास्वादयन्संतर्बहिर्व्यवहरन्नपि॥२२२॥धीरत्वमस्य
ज्ञावस्येप्यानंदास्वादवांछया॥तिरस्कृत्याखिलाक्षाणिनचितायांप्रवर्तने॥२२३॥भारवाहीशि
रोभारंमुक्त्वास्तेविश्रमंगतः॥संसारव्यापृतित्यागेतादृग्बुद्धिस्तुविश्रमः॥२२४॥ ॥

याणिन्यकृत्य।आनंदानुसंधानएवप्रवर्तमानत्वंधीरत्वमित्यर्थः॥२२३॥विश्रांतिशब्दस्यविवक्षितमर्
थंसदृष्टांतमाह॥भारवाहीति।यथालोकेभारंवहन्पुरुषःश्रमहेतुंशिरसिस्थितंभारंपरित्यज्यश्रमर
हितोवर्ततेतथासंसारव्यापारपरित्यागेमतिश्रमरहितत्वात्समितिज्ञायमानायाबुद्धेःसाविश्रमशब्दे॰ ३८

नोच्यतइत्यर्थः॥२२४॥इदानींफलितमर्थमाह॥विश्रांतिमिति।परमांनिरतिशयांविश्रांतिमुक्तलक्षणांप्राप्तः
पुरुषःस्वस्थोदासीन्यदशायांयथापरमानंदास्वादनेतात्पर्यवान्भवतिएवंसुखदुःखहेतुप्रातिका
लेपितदनुसंधानंपरित्यज्यनिजानंदास्वादनएवतात्पर्यवान्भवतीत्यर्थः॥२५॥ननुदुःखस्यप्रतिकूल

विश्रांतिंपरमांप्राप्तस्त्वौदासीन्येयथातथा॥सुखदुःखदशायांचतदानंदैकतत्परः॥२५॥
अग्निप्रवेशाद्धेतोधीःशृंगारेयादृशीतथा॥धीरस्योदेतिविषयेऽनुसंधानविरोधिनी॥२६॥

त्वेनतदनुसंधानेच्छाभावेपिवैषयिकसुखस्यानुकूलत्वेनपुरुषैरर्थ्यमानत्वात्तदनुसंधानेच्छाकुतोन
भवेदित्याशंक्यतस्यविषयसंपादनादिव्यापारात्तीव्रबहिर्मुखत्वापादनेननिजानंदानुसंधानविरोधि
त्वात्तदिच्छापिविवेकिनोनजायतइतिदृष्टांतप्रदर्शनपूर्वकमाह॥अग्नीति।शीघ्रंदेहविमोचनेच्छयांदव

नगायां सूत्सां तद्विजं व कारणे ऽलंकारादौ यथा शिल्पवेदुः वैरस्य बुद्धि रूमप्यतेऽवं वैराग्यादिसाधनसंपन्नस्य
विवेकिनो ब्रह्मानुसंधानविरोधिनि विषयसुखेपीत्यर्थः॥१२६॥ मा भूद्विरोधिविषयसुखेच्छा ऽप्रयत्नसो
लभ्ये नावहिर्मुखत्वहेतौ विषये किं भवतीत्यत आह। अविरोधीति॥१२७॥ दृष्टांतं विवृणोति। एकैवेति।

अविरोधिसुखे बुद्धिः स्वानंदे च गमागमौ॥ कुर्वत्यास्ते क्रमादेषा काकाक्षिवदितस्ततः॥१२७॥
एकैव दृष्टिः काकस्य वामदक्षिणनेत्रयोः॥ यातायातेवमानंदद्वये तत्त्वविदो मतिः॥१२८॥

यथा काकस्य दृष्टिः दृश्यतेऽनयेति दर्शनसाधनं चक्षुरिंद्रियमेकमेव वामदक्षिणनेत्रयोर्गोलकयोः
पर्यायेण गमनागमने करोति एवं विवेकिनो बुद्धिरप्यानंदद्वय इत्यर्थः॥१२८॥ ३९

दार्ष्टांतिके प्रपंचयति। भुंजान इति। तत्त्ववित् विषयान् भुंजानस्तज्जन्यं विषयानंदं उपनिषदभ्यासादव
गतं ब्रह्मानंदं च लौकिकवैदिकावुभौ विषयानंदब्रह्मानंदौ द्विभाषावेदीव जानीयादित्यर्थः॥१२९॥
ननु दुःखानुभवदशायां उद्वेगे सति कथं निजानंदानुभवः स्यादित्याशंक्याह दुःखप्राप्ताविति। यतोऽस्मा

भुंजानो विषयानंदं ब्रह्मानंदं च तत्त्ववित्॥ द्विभाषाभिज्ञवद्विद्यादुभौ लौकिकवैदिकौ॥१२९॥
दुःखप्राप्तौ न चोद्वेगो यथा पूर्वं यतो द्विदृक्॥ गंगामग्नार्धकायस्य पुंसः शीतोष्णधीर्यथा॥१३०॥
इत्थं जागरणे तत्त्वविदो ब्रह्मसुखं सदा॥ ॥

त्कारणाद्विवेकी द्विदृक् लौकिकवैदिकव्यवहारयो
रुभयोरपि वेत्ताऽतो दुःखप्राप्तावपि पूर्ववदज्ञानदशायामिव न तस्योद्वेगः विवेकेन तदा तदाबाधस्मा
नत्वात् ततो दुःखानुभवकालेऽपि निजानंदानुसंधानं न विरुध्यत इत्यर्थः। युगपदुभयानंदानुसंधाने

दृष्टांतमाहगंगेति॥१३०॥फलितमाह।इत्थमिति॥सदासुखदुःखानुभवदशायांतूष्णींस्थितौचेत्यर्थः॥
नकेवलंजागरणएवतज्ज्ञानंकिंतुस्वप्नावस्थायामपीत्याहतद्वासनेतिहेतुगर्भंविशेषणंजाग्रद्वासना
जन्यत्वात्स्वप्नस्यतत्रापितद्ब्रह्मसुखंतथाजाग्रदवस्थायामिवभासतइत्यर्थः॥१३१॥ननुस्वप्नस्यानं

भातितद्वासनाजन्येस्वप्नेतद्भासतेतथा॥३१॥अविद्यावासनाप्यस्तीत्यतस्तद्वासनो
त्थिते॥स्वप्नेमूर्खवदेवैषसुखंदुःखंचवीक्षते॥१३२॥ ॥

दानुभववासनाजन्यत्वेसत्यानं
दएवभासेतेत्याशंक्याह।अविद्येति।नकेवलमानंदवासनाबलादेवस्वप्नोजायतेकिंत्वविद्यावा
सनाबलादप्यतस्तद्वासनाजन्यत्वात्तत्रास्यसुखाद्यनुभवोभवतीत्यर्थः॥१३२॥ ॥ ॥

एतावताग्रंथसंदर्भेणोक्तमर्थंनिगमयति।ब्रह्मानंदेति।ब्रह्मानंदनामकेऽध्यायपंचकात्मकेग्रंथेऽ
स्मिन्प्रथमाध्यायेसुषुप्त्यवस्थायामौदासीन्यकालसमाध्यवस्थायांसुखदुःखदशायांचस्वप्रका

ब्रह्मानंदाभिधेग्रंथेब्रह्मानंदप्रकाशकं॥योगिप्रत्यक्षमाध्यायेप्रथमेस्मिन्नुदीरितं
॥१३३॥ ॥इतिब्रह्मानंदःसमाप्तः॥ ॥१॥ ॥

शचिद्रूपब्रह्मानंदस्यप्रकाशकंयोग्यनुभवरूपंप्रत्यक्षमुक्तमित्यर्थः॥इदंचोपलक्षणमागमा
दीनांतेषामप्यत्रप्रदर्शितत्वात्॥१३३॥ इतिश्रीब्रह्मानंदेयोगानंदोनामप्रथमोऽध्यायः॥ ॥१॥